मङ्गलविधि

निखिलमतविजयेषु कारयति दर्शनितार् ।

अत्र त्रिपुण्ड्रधारणभस्मोद्धूलनादिचिह्नं, शङ्खचक्रधारणादि-चिह्नं, कमण्डलुकूर्चिकादिचिह्नं, विष्णुलिङ्गादिचिह्नं, पूर्व-मध्यसरसचन्दनादिचिह्नं, एकदन्तचिह्नं, सर्वेषपादहरि-द्रादिचिह्नं, स्फटिकाक्षपञ्चजटाविभूत्यादिचिह्नं, वराटमालि-काद्यवेषभाषादिचिह्नं, सुवर्णादिरचितमङ्गलचतुर्बाहुकमादिदण्ड-तोमरपाण्यादिचिह्नं, पुष्पकोदण्डाद्युपकल्पितवसन्तोत्सवभूषण-चिह्नं, नवनिधानरूपकण्ठमालिकादिचिह्नं, मणिरचितवज्रायुध-धारणादिचिह्नं, महिषरूपवेषप्रतिमादिचिह्नं, सलिलमध्यस्थ-लपूजादिचिह्नं, वायुपुरुषस्तवोपासनचिह्नं, भूमिदेवतोपासन-चिह्नं, तीर्थयात्रोदकधारणादिचिह्नं, शून्योपासनचिह्नं, आदिवराहोपासनचिह्नं, [illegible]पासनचिह्नं, सत्त्व-रजस्तमोगुणोपासनवेष[illegible]चिह्नं, [illegible]दिष्टप्रधानो-पासनचिह्नं, तर्कराद्धान्तनिश्चितपीलूपासनचिह्नं, जैमिनिमत-सिद्धकर्मप्रपञ्चसञ्चारचिह्नं, पूर्णिमादिकालवेषचन्द्रोपासनादि-चिह्नं, अङ्गारकादिपञ्चग्रहोपासनचिह्नं, क्षपणकमतसिद्धकालो-पासनादिचिह्नं, दर्शादिपुण्यकालामादितपवित्रपितृपासनादि-चिह्नं, सर्पादिरचितशेषफणधारणादिचिह्नं, वैनतेयमूर्त्यु-पासनचिह्नं, सिद्धनाथादिसिद्धवेषभाषाधारणादिचिह्नं, गान विशेषे विश्वावसूपासनादिचिह्नं, चिताभस्मोद्धूलनकपालविशे-षधारणादिभिर्भूतराडुपासनादिचिह्नं, श्मशानादिषु कङ्कणादि-धारणवेतालोपासनचिह्नमित्यादिबहुविधं यथेष्टं समाप्य

*ifRf?R xrfis^g ?sr^T^rratf^rf ftannr ^*ps^r* ^^ "Sipr-
fffftfii w n , ftiwi HT^mrf gift wffift 1 ffrawn

त्रिभ्यो लोकेभ्योऽसुरान् प्राणुदन्त यदुपसद उपसद्यन्ते आज्य-पराणुत्त्यै नान्यामाहुतिं पुरस्ताज्जुहुयादिति। पुरा राक्षसानां मध्ये तिस्रः पुर आसन् अयोमयं रजतमयं हिरण्मयञ्च पुरनामकान् त्रीन् राक्षसान् जेतुं देवा असमर्था बभूवुः, ततस्ते देवा इषुं संस्कुर्वन्तः कल्पयामासुः त्रिदेवात्मिकामिषुं संस्कुर्वन्तः मूले अग्नि-देवात्मिकां मध्ये चन्द्रदेवात्मिकां अग्रे विष्णुदेवात्मिकामित्यर्थः, ततस्ते देवा अब्रुवन् क इमामस्यति क एनान्धारयति यतो अग्नीषोमविष्णुतेजःकूटात्मकत्वेनात्यन्तभारत्वात् अनन्य-तेजोऽनुपलम्भाच्च। एतादृक् पुरुषः स्वबलेन धृत्वा को वा प्रयुन-क्तीति विचार्य्य रुद्र इत्येवमब्रुवन् यतो रुद्रः क्रूरः किल वै अत एनां अस्तुं स एव समर्थः, यतो रुद्रस्याग्न्यादितेजः सर्वं स्वकी-यमेवास्ति। कथमित्युक्ते तावदग्निचन्द्रौ भगवतो नेत्रे विष्णुस्तु तदीयदेहार्द्धात्मिकांशस्वरूपः अतः स्वतेजस्तस्य भारो न भव-तीति रुद्रं प्रार्थयामासुः। सोऽब्रवीद्वरं वृणै भवद्भ्यः ब्रह्मादि-भ्यो वरमिच्छामीत्यर्थः किमिति अहमेव पशूनामधिपतिः असानि इति, एवं रुद्रेणोक्ता अब्रुवन्, तस्माद्रुद्रः पशूनाम-धिपतिः असानि इति रुद्रेणोक्ता अब्रुवन् तस्मात् रुद्रः पशूनामधिपतिरिति वयं ब्रह्मादयः सर्वे देवाः पशवः अस्माकं त्वमेक एव पतिरित्युक्ता तदीयलिङ्गविभूत्यादिचिह्ना-नि सर्वे धारयामासुः। पशूनां ब्रह्मादीनां पतिः स्वामी पशु-पतिः तस्मै नमो नम इति अमरकोऽपि प्रतिपादितमात्। तस्मात् ब्रह्मनारायणादिभिः सर्वैरुपास्यः स्वामीत्यर्थः। अतः सर्वै

देवा लिङ्गत्रिशूलमुद्राधारिणः विभूतिरुद्राक्षालङ्कृतदेहिनः रुद्रस्फटिकाक्षमालिकालङ्कृताः पञ्चाक्षरीमन्त्रराजोच्चारणचञ्च-दधरोष्ठाः ईश्वरध्यानिरताः परमेश्वरपादारविन्दयुगलं निज-किरीटैरर्चयन्तः भक्ताग्रगण्या बभूवुः । अतो निजलिङ्गत्रिशूल-सविभूतिरुद्राक्षधारणपरान् ब्रह्मादीन् प्रथमोत्कृष्टभक्ता-न्दृष्ट्वा तद्रक्षणाय पुरत्रयवधाय च मेरुगिरिं धनुः व्यालाधि-राजं भूमिं रथं चन्द्रसूर्यात्मकं चक्रद्वयं वेदानश्वान् ब्रह्माणं सारथिञ्च कृत्वा वन्द्यादिभिरिव देवैः संस्तूयमानः परमेश्वरः (इत्यादि पुष्पदन्तोक्तप्रकारेण) तानिषुमसृजत पुरोपरि मुमोच सेषुः पुराणि छित्वा महेश्वरस्य निषङ्गान्तरं प्राप तस्मात् पुरहरस्य लिङ्गादिचिह्नानि देवैरपि धृतानि तेषां मुख्यतया शिवभक्तत्वात् पशुत्वाच्च पशुपतिचिह्नधारणं युक्तमेव लोके सेव्यसेवकयोस्तथादर्शनाच्च तस्मात् शिवभक्तैरस्माभिश्च तच्चिह्नधा-रणमवश्यमङ्गीकर्तव्यमेवेति मन्ये शाङ्कराचार्याः, त्रिपुरसं-हारकाले रुद्रभक्तानामपि देवानां लिङ्गाद्यङ्कनमनुपपन्नं कुतस्त-थाविधप्रमाणाभावात् नारदादिमुनिषु च विभूतिरुद्राक्षस्फ-टिकधारणे विद्यमानेऽपि लिङ्गाङ्कनाभाव एव; तस्मादेव मुन्या-दिषु कदाऽपि तप्तत्रिशूललिङ्गादिचिह्नं न विद्यते " श्रद्धा-भक्तिध्यानयोगादवैहि " इति कैवल्योपनिषद्वचनाल्लिङ्गाद्यङ्कनस्य ज्ञानाङ्गत्वाभावात् । नान्यः पन्था विद्यते अयनाय इति तमेवै-दमवाप्यमित्यादिश्रुतेश्च मोक्षस्य ज्ञानसाध्यत्वमुपपन्नं तस्मा-न्निर्मलान्तःकरणप्राप्यस्य मोक्षस्य वह्नितापेन प्रयोजनाभावात्

तत्तल्लिङ्गादेर्निन्दादर्शनाच्च लिङ्गधारणमयुक्तमेवेति सिद्धं । भवन्मते ऽपि देवाद्यगणस्य भिन्नस्य च अंशांशिभावत्वेन तथापि तद्धारणं व्यर्थमेव तयोर्भेदाभावात्, यदि राजाङ्कनं भृत्यस्येत्युक्तं तदप्ययुक्तं राज्ञः एकछत्रादिचिह्नं वर्त्तते तद्भृत्यस्य नास्त्येव। त्रिशूलाद्यायुधविशेषं देवो बिभर्त्ति भक्तैरपि तथायुधधारणं कर्त्तव्यमिति किल भवद्भिरुक्तं, तथा चेद्योमयं त्रिशूलादिकं धारयतां भारमात्रमेव प्रयोजनं भवत्यत् नास्त्येव तथाविधकार्य्यकारकतायां । किञ्च नीलकण्ठभुजगभूषणादिचिह्नं देवस्यास्ति तदपि धार्य्यं वृश्चिकादिविषमात्रेण म्रियमाणस्य मर्त्यस्य न कालकूटभक्षणे शक्तिरस्ति रज्जुदर्शनेन सर्पभ्रान्त्या पलायमानस्य भुजगभूषणता कथं युज्यते। तस्मात् पामरबुद्धिं विहाय लिङ्गाद्यङ्कनं परित्यज्य वेदोक्तकर्मसमर्पणं भगवति कृत्वा श्रीविश्वेश्वरोपासनाध्यानं कुर्वन् वर्त्तयन् दृढे तत्त्वज्ञाने जन्ममरणप्रवाहकारणमूलाज्ञाननिवृत्तौ जातायां लिङ्गशरीरभङ्गद्वारा मुक्तो भवतीति परमात्मापितः भक्ताद्यगण्यस्तदनुचारिणश्च परमतकालानलादयः परमगुरुं श्रीशङ्कराचार्य्यं नत्वा स्ववन्धुपुत्रमित्रादिभिः सह त्यक्तलिङ्गाङ्काः सम्यगुपदिष्टशुद्धाद्वैतवादिनो बभूवुः। इत्यनन्तानन्दगिरिकृतौ शिवमतैकदेशनिवर्हणं नाम पञ्चमं प्रकरणं ॥ ५ ॥

तस्मादनन्तशयनं (१) नाम भगवद्धर्ममूर्त्तिविश्रित-प्रदेशं संप्राप्तः तद्देवदर्शनं कृत्वा निजशिष्यैर्मासपर्य्यन्तमवास तत्र, भक्ता भागवताश्चैव वैष्णवाः पाञ्चरात्रिकाः । (२)

वैखानसाः कर्म्महीनाः षड्विधा वैष्णवा मताः ॥
क्रियाज्ञानविभेदेन त एव द्वादशाभवन् ।
तानाह शङ्कराचार्य्यः किं वो लक्षणमुच्यतां ॥

आदौ भक्ता ऊचुः । स्वामिन् वासुदेवः परमपुरुषः सर्व्वदा जगदवनपरः सर्व्वज्ञः सर्व्वदेवकारणः स एव रामकृष्णा-द्यवतारविभेदेन भूभारं निवर्त्तयितुं शिष्टावनमशिष्टसंहारं च कुर्व्वन् पुण्यस्थलेषु निजाविर्भूतमूर्त्तिप्रतिष्ठामाचकार । मूढा वयं किल तदीयपादपङ्कजसेवया विगतपापास्तल्लोकवासं प्राप्स्याम इति निश्चयबुद्ध्या कौण्डिन्यमुनेः अंशतो विष्णुरनन्त-नाम्ना किञ्चनैव वर्त्तते, तदीयचरणसेवनमनुदिनं कृत्वा तीर्थ-प्रसादादिभिस्तन्निमित्तं गोपुरप्राकारादिषु सम्मार्जनप्रोक्षणादिकं कुर्व्वन्तः सन्तो वसामः ।

भक्तेन रहितानेतान् स्वार्त्तवंशसमुद्भवान् ।
अशुद्धपुण्ड्रपरान् भक्ताननन्ताद्विदधे मधेत् ॥ (३)

---

१ रामेश्वरादनन्तशयनं । का. पु. । तै. पु. ।

२ वैखानसाचारचरिताः । का. पु. ।

३ भवेत् । का. पु. । स. पु. । तै. पु. ।

ज्ञानमूलमिदं शास्त्रमित्याचार्यकिंकरोदिताः ।

नित्यकर्मप्रामाण्यमिव प्रतिपद्यति यः किमप्रामाण्यमिति पतिमर्थे मदीयाचार्यो विविधः (१) ज्ञानक्रियाभेदात् । ज्ञानिनो यथा विष्णुशर्मादयः परे कर्मठाः मण्डगुप्तादयः श्रीमदनन्तभक्ताः यत्रैव वर्त्तन्त इति विष्णुशर्मा वक्ष्यं विप्रस्य शङ्कराचार्यकृतमवश्यं भवत्विति ज्ञानिनः किल ज्ञानस्य वावश्यं तेन फलमपि किमित्युक्ते विष्णुशर्मादि, श्रीमदनन्तभगवत्पादकमलमेव शरणमिति तूष्णीमवस्थितिरेव ज्ञानं मद्गुर्वा विना ज्ञानकणमपि न भवतीति, तमाचार्योऽन्वशीत् मूढ विष्णुशर्मन् ।

“ जन्मना जायते शूद्रः कर्मणा जायते द्विजः । ”

इत्याश्रमधर्मानुकूलं कर्म सर्वेषामवश्यं तस्यैव तपःप्रकाशकत्वात्, सन्यासिनामपि विहितं कर्म कर्त्तव्यमेव “ कर्महीने तु पातित्यमिति दर्शनात् “ अहरहः सन्ध्यामुपासीत, उदिते च सूर्ये प्रातर्जुहोति, उद्यन्तमस्तं यन्तमादित्यमभिध्यायन् कुर्वन् ब्राह्मणो विद्वान् सकलं भद्रमश्नुतेऽसावादित्यो ब्रह्मेति ब्रह्मैव सन् ब्रह्माप्येति य एवं वेद ” इति च, सर्वे वेदा ब्राह्मणोचितं नित्यकर्म प्रशंसन्ति श्रौतस्मार्त्तादिकं, अतः कर्मार्थमेव श्रुतिप्रवृत्तिः, अतः सर्वैराश्रमिभिः वेदोक्तं कर्म अवश्यं कर्त्तव्यमेव ।

---

१ नित्यकर्मप्रामाण्यमिव यः प्रामाण्यं किं न प्रतिपद्यति । ख. पु. । नित्यकर्मप्रामाण्यमिव प्रतिपद्यति यः किमप्रामाण्यं । ग. पु. । ख. पु. ।

जीवन् कर्मपरित्यागं यः करोति नराधमः ।
स मूढो नरकं याति यावदाभूतसंप्लवं ॥

इति मनुवचनदर्शनात् देवार्चनस्नानभिक्षाचर्यादिकं कर्म यतीनाम् विहित एव । श्रौतस्मार्तकर्मसन्ध्यावन्दन-वर्णाश्रमेविहितश्राद्धपाकयज्ञदेवातिथिपूजादिकं कर्म वान-प्रस्थपर्यन्तमेव, संन्यासेऽनु किल विधिः, तपो नामप्रमादपरमिति, मन्त्रपारिवध्य सन्ध्यास्नाना-गेहपूजागुरुकुलवासादिकं कर्म उचितं यतः सर्व-भ्रष्टानां भवतां मा भूत्प्रत्यवायप्रसक्तिः स्यात् । किन्तु मम मार्ग-वर्त्मनो वयमिति भवद्भिरुक्तं तत्राप्यधिकारो नास्त्येव, यद्यपि तर्हि सद्गुरुपदं मन्त्रमार्गोविभेदरूपपरार्थभावं षट्चक्र-मार्गं दुर्लभं (१), एवमाचार्यैरुक्ते विष्णुशर्मादयः इदमूचुः, यतिनाथ भव कथं ज्ञानं योगक्रियाभ्यामिर्विहितं निकाम-ममप्रादेवपादद्दर्शनं विना न किञ्चिदिति (२), तद्वचः श्रुत्वा सम्भूताश्चर्यः (३) श्रीशङ्कराचार्य इदमाह, विष्णु-शर्मन् कतिपयैरहोभिरेवं स्थितिः । स आह, महाराज सप्तमः पुरुषः गतिस्त्वत् किञ्चित्कार्यं शील इति वाक्यं मया श्रुतं । तच्चि-

१ षट्चक्र मार्गमर्थ्यं । पा. पु. ।

२ अस्माभिर्न विहितं निकामममन्तदेवपादद्दर्शनं विना । का. पु. । अस्माभिर्विहितमिदादि न किञ्चिदितीति लिखितं पाठान्तरं । स. पु. ।

३ तद्वचोऽमुष्यस्य समन्ताद्भूताश्चर्यः । मा. प. ।

अथ कोपाविष्टोऽभ्यागतगणाग्रणीः सकलगुरुराट् हे शाठ्य सकल-धर्मवर्जित न दूराच्छेति लम्बंवर्गैकाग्रकं दण्डो भवेदिति विष्णुशर्माणमशपीत्। स तु भीतपरितप्तमनाः सकलः समस्तापराधं क्षमस्वेति दण्डवत्प्रणम्य सम्पुटितकरद्वयः साश्रुवदनमातिष्ठत। विष्णुशर्माभिधमेनं शरणागतं दुर्मार्गद्रष्टारो वयमिति धिया भगवांस्तस्य प्रायश्चित्तकरणे हस्तामलकादीञ्शिष्यान्नियोजयामास। ते विष्णुशर्मप्रमुखानां स्नानश-श्रद्धकसमर्पणमुण्डनमहस्नानघटस्नानव्रतप्राजापत्यकृच्छ्रप्राच्योदी-न्याचर्मोद्दानमध्ययन-(१)-गोगर्भाधानजातकर्मनामकरणचौ-लोपनयनविवाहप्रमुखकर्माणि यथाविधि समाचरन्त। विष्णुशर्मादयोऽपि विहितशास्त्रार्थानुष्ठानतत्पराः श्रीपरमगुरुमिदमूचुः। स्वामिन् भवत्कृपया शास्त्रार्थसिद्धिरासीत्। मोक्षसिद्धिः केनोपायेन नो भविष्यतीति जल्पन्तं विष्णुशर्माणमिदमब्रवीत्।

शाक्ताश्चाचारदेवाः सूर्योऽपि विष्णुर्दिनेश्वरः।
उमा गणपतिश्चैव तेषां पूजापरा नराः॥
अभ्यापेक्षधिया कामान् परित्यज्याचरन्ति ते।
एवं कृते नित्यकर्म क्षमसे भगवन् प्रभो॥
जीवस्य च भिदाभावो नास्त्येव न संशयः।
मूलाज्ञानस्य तस्य निवृत्तिर्ज्ञानकारणं॥ (२)

---

१ चान्द्रायण। का. पु।

२ मूलाज्ञानस्य निवृत्तिज्ञानस्य कारणं मतं। का. पु। स पु। तै. पु।

तेन भक्ते विष्णुदेवे मुक्तिर्भवति नान्यथा।
इत्यादिष्टो विष्णुशर्मा दण्डवत् प्रणिपत्य तं॥
जगाम कारणं तस्य नित्यकर्म गुरुं स्मरन्।
स्मार्त्ताचारपरित्यागः पञ्चपूजाविवादकः॥
त्रिपुण्ड्रं भस्मना कुर्वन् चन्दनेन च सुव्रतः।
स्नात्वा मृत्तिकया चोर्ध्वपुण्ड्रं कुर्वन्तु मद्व्रताः॥

एवं निराकृतेषु विष्णुशर्मादिभक्तेषु तदन्ये कर्माश्रितभक्ताः मल्लगुप्तादयः समागत्य मुनीन्द्रमिदमूचुः। स्वामिन् स्मार्त्तमार्गेण स्नानादिकर्म कुर्वन्तो वयमपि कर्मफलं भगवत्पादार्पणं कृत्वा निवसामः, इति मल्लगुप्तलक्ष्मणदासकमलाभक्तादिभिर्विज्ञापितः श्रीशङ्कराचार्यः, तान् प्रत्यवदिदमुवाच इतः परं पञ्चपूजाफलपरिलब्धचित्तशुद्धयः शुद्धाद्वैतविद्याविशुद्धनिराकृतमायारचितभेदवासनाः यूयं स्वात्मानन्दानुभवप्रकाशितशरीराः सच्चिदानन्दैक्यफलमनुभविष्यथेति गुरुवाक्यं श्रुत्वा नत्वा स्वस्था बभूवुः। एवं भक्तमते निराकृते भागवतमतावलम्बी कश्चिदिन्द्रदेवः प्रत्यवतिष्ठते भक्तवर्यात्।

सर्ववेदेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम्।
तत्फलं समवाप्नोति स्तुत्वा देवं जनार्दनम्॥

अनेन मन्त्रेण जगत्पतिध्यानमात्रेणैव वेदपारायणतीर्थयात्रादिपरिलब्धफलस्य सत्त्वात्। मिथःपरिकीर्त्तनमनुदिनमाचरन् स्वामिन् 'कलौ संकीर्त्य केशवं' इति वचनात् मुक्तिः करस्थैव तस्मात्मतस्य निर्गमेऽकृत्वात् प्रामाण्यं स्मृत्याचारानुकूल-

लक्षणत्वात् स्मार्त्तं स्नानादिसत्कर्म तद्युक्तोऽपि भगवद्भ-
क्त्विभागवतः श्रियःपतिकटाक्षादृष्टमभवं नाशिन्विचारः
कर्त्तव्यः सुवर्णस्य परिमलप्राप्तिरिव सद्गुणाश्रयस्य विष्णुस्तुतिः
किल, तस्मात् श्रीमन्नारायणभक्त्या चोर्द्धपुण्ड्र शङ्खचक्रगदापद्मा-
दिचिह्नितस्तुलसीमालिकायुगलः सार्व्वकालिकमुखैः निरन्तरं
स्तौमि नारायणमेव शरणमिति वदन्ममाचार्य्योऽभवीत्, भाग-
वत भवन्मतमसमञ्जसं विरोधसद्भावात् कथं चक्राद्यङ्कनस्य
निन्दादर्शनात्। किञ्च भगवतो मूर्त्तिः सदृशा भवति परव्यूह
विभवार्चाभेदात्। परमूर्त्तेः स्वरूपाभावाल्लिङ्गाभावः आकाश
शरीरं ब्रह्मेति यदुक्तं तद्ब्रह्म कं ब्रह्म खं ब्रह्मेत्यादि श्रुति-
भ्यः, तद्रूपं वक्तुं वेदा अपि असमर्था एव यतो वाचो निव-
र्त्तन्ते अप्राप्य मनसा सहेत्यादि श्रुतिभ्यः, अतो मनोवाक्य-
गोचरं ब्रह्मेत्यर्थः, तदेव परमूर्त्तिः। व्यूहमूर्त्तिर्विराट् चतु-
र्द्दशलोकात्मकः तस्य ब्रह्माण्डकर्परपर्य्यन्तमाकाशः शिरः,
चन्द्रसूर्य्यौ नेत्रे, प्रागादिदिशः श्रोत्रे, अन्तरीक्षलोको घ्राणं,
मेरुः पृष्ठवंशः, शिखरत्रयं भुजकण्ठाः, प्रत्यन्तपर्वताः पृष्ठपार्श्व-
वक्षांसि, उपपर्वताः शाखाद्यादीनि, समुद्रा रक्तं, सरा स्नायूनि,
वृक्षलताः रोमाणि, भूमिः कुक्षिः, द्वीपा वलयः, भूरेखा रोम-
राजिः, भूमध्यप्रदेशो वस्तिः, मेरुः शिश्नं, दिग्दन्तिपङ्क्तिर्नित-
म्बोरुभागः, अतलादिसप्तकं कटिपादान्तरालः, कूर्म्मः पादौ,
एवं वर्त्तमानस्य विराड्देहस्याङ्केन तत्तदुपाधारत्वं समर्थये-
न्तु ह । शीर्षादिपादपर्य्यन्तं चिह्नेन केनचिद्योगमयेन हृद्

-तमेन शरीरमाहृत्य हृदनाशात्परं वैश्वर्यसिद्धिर्भविष्यति। चिन्मय-
मूर्त्तः सत्यात्मा चेतने सत्यात्मस्वरूपात्मके भासमाने विद्य-
माने अचेतनयोः शङ्खचक्रयोश्चिह्नं किमर्थं कर्त्तव्यं। चेतन-
परित्यागे अचेतनपरिग्रहणे लाभाभावाद्दोषप्राप्तेश्च तप्त-
धारणीये उक्तत्वात्। यदि लौहमये आयुधरूपे शङ्खचक्रादायुध-
चिह्ने विहाय लोहमयान्येव शस्त्रास्त्राकाराणि कृत्वा तैरेव चिह्न-
धारणं कुरु तेन अर्थक्लेशमात्रं फलमस्ति। तथा कार्यं चेत् प्राणा-
न रक्षन्ति इति इति चेत् तथापि लौहमयं कृत्वा विष्णुमेव
हस्ताभ्यां धारय बाहुभारमात्रं फलमस्ति। अर्चामूर्त्तीनां विश्वा-
सत्वात् तद्रूपेण तमेव वाऽऽहूय किं तस्मात् भगवच्चिह्नधारणं
कर्त्तव्यमिति पापबुद्धिं त्यक्त्वा स्वकर्म नित्यादि यथाशक्ति
कृत्वा तत्फलसमर्पणं भगवत्येव विधाय शुद्धाद्वैतवादिनं गुरुमा-
श्रित्य तदुपदेशश्रवणादिनाष्टकर्मबन्धः मुक्तो भविष्यसि। किञ्च
स्तुतिमात्रेणैव मुक्तिः करिष्यतीति भवद्भिरुक्तं तदत्यन्तासम्बद्धं
ब्रह्मणो वागतीतत्वेन स्तुतेरप्रवृत्तेः मुक्तिः सुतरामशक्यैव
ज्ञानं विना मुक्तिर्नास्त्येव नान्यः पन्था विद्यतेऽयनायेति
निषेधदर्शनात्। यद्वाचाऽनभ्युदितं येन वागभ्युद्यते तदेव
ब्रह्म त्वं विद्धि नेदं यदिदमुपासते यन्मनसा न मनुते येनाहुर्मनो-
मतं तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते इत्यादि श्रुतिभ्यः
ब्रह्मणो वाङ्मनोऽत्यतीतत्वात् ईदृक् स्वरूपं ब्रह्मेति वक्तुमश-
क्यत्वात् तद्विधानादिकं सर्वदा अनुपपन्नं। जन्मान्तरकृत-
साभ्यासपरिपक्वबुद्धेः कस्यचित् गुरूपदेशवशात् अवगत-

ब्रह्मज्ञानस्य मुक्तिर्भवति। आश्चर्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्टः, न नरेणावरेण प्रोक्त एष नु सुविज्ञेयो बहुधा चिन्त्यमान इत्यादि कठश्रुतिभ्यः। ब्रह्मबोधस्यासाध्यत्वात् ब्राह्मणेन कर्मनिष्ठावता भवितव्यं तदनुष्ठानेन चित्तशुद्धौ जातायां बहुजन्मतपःफलादाविर्भूतब्रह्मस्वरूपप्रपञ्चः सन् मुक्तो भवति। उक्तञ्च भगवद्गीतासु।

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते। इति
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः। इति।

यत्र ब्रह्मणि प्रपञ्चदृष्टिर्जायते (१) तदनन्तरज्ञानेन नेदं जगत् किन्त्वात्मैव जायते तदा स एवाहं भेदाभावो (२) भवत्येव, स एव मुक्तिरिति। एवमुपदेशं (३) कुर्व्वन्तं परमगुरुं श्रीशङ्कराचार्य्यं विप्रदेवः सम्यगभिवाद्य स्वामिन् मदीयमतेनालं तस्य मुक्तिजनकत्वाभावात् तावद्भवत्पाददर्शनं मम सुकृतशतेनैवाभूत्। अतः सदुपदेशेन मां कृतार्थं कुर्विति नमस्कारपुरःसरं विज्ञापितः श्रीपरमगुरुरिदमवादीत्, भो विप्रदेव चिह्नादिकं परित्यज्य यथाकालोचितं नित्यकर्म कुर्व्वन् सदहं ब्रह्मास्मीति भावय, सिद्धायां भावनायां मुक्तो भवसीति॥ इत्यनन्तानन्दगिरिकृतौ भागवतमतनिवर्हणं नाम षष्ठं प्रकरणम्॥ *॥

१ प्रपञ्चदृष्टिर्वीयते। का. पु.।
२ तदात्मनासह भेदाभावो। का. पु.।
३ एवं मुमुक्षुपदेशं। का. पु.।

सप्तमं प्रकरणं।

एवं भक्तभागवतमतयोः पुनरन्यो वैष्णवः प्राप्नुयादिति प्रत्यवतिष्ठते मन्त्रवर्णात्।

यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात्।

ॐ। नमो नारायणायेति मन्त्रोपासकः स आह। भगवद्भक्तेन वैकुण्ठलोकवासार्थमवश्यं शङ्खचक्राद्यङ्कनं कर्त्तव्यं। नारायणमुद्रादिधरः (१) नारायणाष्टाक्षरोच्चारणमात्रेणैव जन्मसंसारबन्धनाद्विमुक्तः वैकुण्ठभवनं गमिष्यति, शङ्खचक्राद्यङ्कितगात्रः वैष्णवोत्तम इति नानाविधास्तल्लोकवासिनो मुक्ता इति प्रसिद्धिः। तदुक्तं पुराणादौ।

ये बाहुमूलपरिचिह्नितशङ्खचक्रा
ये कण्ठलग्नतुलसीनलिनाक्षमालाः।
ये वा ललाटफलके लसदूर्ध्वपुण्ड्रा-
स्ते वैष्णवा भुवनमाशु पवित्रयन्ति। इति

१ मन्त्रोपासकः वैकुण्ठभुवनं गमिष्यतीति। नमो नारायण मुद्रादिधरः। का. पु.।

शङ्खचक्राद्यङ्कनस्य पुराणपठितत्वादवश्यं कर्त्तव्यमेव भगवच्चिह्नत्वात्। एवं प्राप्ते शाङ्कराचार्य्याः। तप्त शङ्खचक्रधारणं परिहर्त्तव्यं कस्मात् तद्बोधकश्रुत्यभावात् (१)। अतप्ततनूर्न तदामो अश्नुत इति श्रुतिस्तु प्रमाणमितिचेन्न। तपस्तप्ततनुरेव ब्रह्मबोधस्याधिकारित्व श्रवणात्। भृगुः ब्रह्मबोधार्थं पितरं वरुणमासाद्य यथोचितं कृत्वा ब्रह्मोपदेशं कुर्विन्युक्ते तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्मेति श्रुतिः वरुणेनोक्तं। तपःशब्दार्थस्तु महापातकध्वंसहेतुभूत-कृच्छ्रचान्द्रायणादिः स्वाश्रमविहितकर्म्मानुष्ठानं वा सकल-वेदवचनविहितस्य वाचिचैतन्यस्य सर्व्वदेवमयस्य ध्यानं वा भविष्यति।

एको देवः सर्व्वभूतेषु गूढः
सर्व्वव्यापी सर्व्वभूतान्तरात्मा।
कर्म्माध्यक्षः सर्व्वभूताधिवासः
साक्षी चेता केवलो निर्गुणश्च। इति।

अतः परमात्मनो रूपगुणकर्म्माभावाच्च तत्स्वरूप-ज्ञानेनैव मुक्तिदर्शनात्, तपोमूलमेव ब्रह्मज्ञानमिति प्राप्तं तस्मात् चक्रादिचिह्नस्यानवकाशः कार्य्यमर्त्यैर्विश्वेशस्याना-युधस्य विद्यमानत्वात्। तच्चिह्नधारणेन तत्संजपेन च वैकु-ण्ठप्राप्तिरिति किंलोके नहि तदपि रमणीयं मेरोर्मध्यशृङ्गेषु त्रिषु वर्त्तमानेषु पश्चिमशृङ्गे रुद्रलोकः मध्यशृङ्गे ब्रह्म-

---

१ तद्बोधकश्रुत्यभावात्। स. पु.।

लोकः ब्रह्मसूत्रे विष्णुलोकः तेषां ब्रह्मावस्थानत्वात्सकलात् तत्प्राप्तिरर्थेन। तद्द्वारा चक्रादिधारणस्य निरर्थकत्वं प्राप्तं। ब्रह्मविदाप्नोति परमिति ब्रह्मविद एव निर्विशेषप्राप्तेः तद-न्यतः क्षीणे पुण्ये मर्त्यलोकं विशन्तीति संसारप्राप्तिकरत्वमेवेति सिद्धं पुराणेषु हृदयारङ्गोपादिषु सर्वचक्रलिङ्गनिषेधदर्शनात् कर्मवाक्यस्य शास्त्रार्थातिरिक्तस्य तद्विरुद्धस्य तत्प्रयत्नस्य श्रु-त्यैव मुक्तिदर्शनादप्रयोजकत्वं चक्राङ्कनस्य प्राप्तं। विष्णु-चिह्नधारणेन विष्णुसमोऽहं भविष्यामीति फलधिया चेच्चक्रधारणमात्रेणैव विष्णुसमाप्तिः शूद्रस्य विप्रयज्ञो-पवीतधारणमात्रेण ब्राह्मण्यप्राप्तिरिव भाति ब्रह्मभावम-वेव ब्रह्मत्वप्राप्तेः ब्रह्मविद् ब्रह्मैव भवतीति श्रुतेः। किञ्च यो। ब्रह्मा चराचरग्रहणादित्यस्याधिकरणस्थस्य विषयवाक्य-मेतत्। यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनं मृत्युर्यस्योप-सेचनं क इत्था वेद यत्र स इति अस्मिन्नधिकरणे तथा भाष्ये सिद्धान्त एवं कृतः, अत्ता परमात्मा कस्मात् चराचरग्रहणात् यस्य च ब्रह्मक्षत्राद्युपलक्षितं जगत् चराचरं ओदनमन्नं मृत्युः सर्वप्राणिप्राणहर्ता उपसेचनं उपदंशः इत्थं को वा वेद यत्र यस्मिन् वसतीत्यर्थः। वेदितुः फलमाह स एव परमात्मैव भवतीति तस्मात् ब्रह्मप्राप्तिः निरुपाधिकब्रह्मवेदनेनैव भवति। सर्वेषां देवानामात्मैकायनमिति बृहदारण्यकश्रुतेः। सर्व-देवस्वरूपोऽपि परमात्मन एवेति चेन्न। कथं सर्वातीतस्ये-श्वरस्य सर्वान्तरत्वं ब्रह्मणो देवानां पृथक्स्वरूपाभावात्

कारणैक्यं सिद्धमेव (१)। अतः एकायनं मुख्यस्थानं। यजुर्मायान्तर्गतस्य वचनं यज्ञ स्वां प्रजायेयेत्यनेन सर्व्वदेवमयत्वं प्राप्तं देवानां तदंशसम्भूतत्वात् (२)। अतो यस्य देवस्य उपासनामविच्छिन्नां करोति तल्लोकप्राप्तिमात्रमेव फलं समधिगच्छति पुण्यक्षये पुनर्मर्त्यलोकप्राप्तेः। तदनन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्यामित्यस्मिन्नधिकरणे जीवस्य तृणजलौकान्यायेन परलोकगमनमुक्त्वा (३) तत्र स्वकर्मसम्पादितफलमनुभूय किञ्चिदवशिष्टे निजकर्मणि पुनर्मर्त्यलोकप्राप्तये पञ्चाग्निविद्यामाश्रयति जीवः। स तु द्युपर्जन्यपृथिवीपुरुषयोषित्सु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पञ्चाहुतीरवलम्ब्य पुरुषाकारो भवतीति अतः संसारमार्गात् दृढतरज्ञानेन विना मन्त्रचक्रादिधारणेन नष्टो भवतीति अनृतवाद एव, सर्व्वस्य मायारूपत्वात् अमायिकसदनुसन्धानेनैव तन्निवृत्तिः (४)। अतः सर्व्वस्य नित्यशुद्धबुद्धमुक्तस्वरूपं सत्यज्ञानमनन्तमणुमहत्त्वादिलक्षणलक्षितं ब्रह्मास्मीत्यनुसन्धानं सदा कुरु। तदनुसन्धानेन भेदगन्धे निरस्ते जीवस्य परमत्वमेव, उक्तञ्च शिवगीतासु।

---

१ कारणैक्यता सिद्धैव। तै. पु.।

२ तदंशभूतसम्भूतत्वात्। वा. पु.।

३ परलोकगमनमुक्त्वा। वा. पु.।

४ अमायारूपत्वादमायिकसदनुसन्धानेनैव तन्निवृत्तिः। वा. पु.।

शिवः शिवोऽहमस्मीति वादिनं यं च कञ्चन ।
आत्मना सह तादात्म्यभागिनं कुरुते भृशं । इति ॥

एवमुपदिष्टः शार्ङ्गपाणिवैष्णवः श्रीशङ्कराचार्यं परमगुरुं नत्वा स्वामिन् भवदुपदेशेन कृतार्थोऽस्मि। इतः परं शुद्धाद्वैतदृष्टौ सोऽसंभावनापरिलब्धफलनिरस्तभिदाशङ्कायां निश्चयेन वर्त्तेऽहमिति दण्डवन्ननाम। आचार्यस्त्वं मुक्तो भवेत्यवादीत । तदनन्तरं निरस्तचक्रः स्मार्त्ताचारपरिप्राप्तगात्रः पञ्चपूजानैपुण्यप्रसन्नसकलदेवदत्तवरः स्वकुलग्रामदेशस्थानशेषानेवमाचकार। इत्यनन्तानन्दगिरिकृतौ वैष्णवमतनिवर्हणं नाम प्रकरणं सप्तमम् ॥ * ।

अष्टमं प्रकरणं।

एवं परिहृते वैष्णवमते पुनरन्यः पाञ्चरात्रागमदीक्षितः प्रत्यवतिष्ठते। स तु श्रीमच्छङ्कराचार्य्यमिदमाह। स्वामिन् भवानथागत्य भक्तभागवतवैष्णवमतनिरसनं कृत्वा यत्ते ते वैष्णवाः किन्तु जातिमात्रोपजीविनः पुण्ड्रादिधारणमात्रेण तद्दीक्षाः तन्मतं भवता निरस्तमेव इदानीमहमपि विष्णुविद्याचाकारणं पाञ्चरात्रं परमवैष्णवमतमवलम्ब्य चिरादनन्तदेवपादकमलाराधनं कुर्व्वन् भगवत्प्रियोऽभवं। पाञ्चरात्रागमस्य निन्दां कर्त्तुमसमर्थ एव ईश्वरोऽपि अतः भगवद्धाममूर्त्तिप्रतिष्ठादिकमपि तदनुष्ठानमूलकत्वात् कर्त्तव्यं। तस्मात् ब्राह्मणैः सर्व्वैरपि पाञ्चरात्रागमाचार एव कार्य्य इति प्राप्ते आचार्य्यैरिदमुच्यते। भो वैष्णव समीचीनमुक्तं भवता, विचार्य्यमाणे वेदाविरुद्धत्वमागमेऽस्ति चेत् तदुक्ताचारः परिग्राह्यो भवति यदि विरुद्धस्तदा स एवाचारः परित्याज्यो भवति। प्रथमं विष्णुभक्तो वैष्णवः विष्ण्वेकदेवतानिरत इत्यर्थः। तादृग्विधस्य वैष्णवस्य विष्णुमन्त्रप्रतिपाद्यत्वेनापि न ब्राह्मण्यभावः स्यात्।

किन्तु गायत्र्युपदेशेनैव ब्राह्मण्यसिद्धिर्भवतीति। अतो मन्त्रा-
चारपरित्यागस्य दुर्निवार्यत्वात् ब्राह्मण्यानुभवाय गायत्र्युपदेश-
ः कर्त्तव्य आसीत् गायत्र्यङ्गीकारोऽपि माऽभूदिति यद्युच्यते
तर्हि गायत्र्यभावे पतित एव स्यात्। तस्मात्तन्त्राचारसद्भावात्
वैष्णवत्वहानिः स्यात्। किञ्चैवमेव रविरश्मिश्च शशमौलिः (१)
तयोरपि ब्राह्मणकर्माधारत्वात्, तस्मादपरित्याज्येषु देवतान्त-
रेषु सद्भावात् तत्परित्यागे ब्राह्मण्यविच्छित्तिदर्शनात् वैष्णव-
मतमनृतमतरमित्युक्ते स अब्रवीत्। भवदुक्तमसमञ्जसं कथं
गायत्र्या अपि विष्णुशक्तित्वात्। तदपि कथं शङ्खचक्रधार-
णस्य विद्यमानत्वाद्यत्र यत्र विष्णुचिह्नधारणत्वं युज्यते तत्र तत्र
तद्रूपत्वं प्राप्यते इति तर्हि रुद्रशक्तिरेवेति वक्तव्या, कथं पञ्च-
वदनेन्दुशेखरत्वाद्युपमानाद् रुद्रस्य प्रागादिमुखसद्भावो यथा
तथैव गायत्र्या अपि चन्द्रमुकुटत्वं रुद्रस्यासाधारणो धर्मः।
तद्रुद्रस्यास्त्यतः गायत्री रुद्रशक्तिरेवेत्यविरुद्धं। किञ्च शरी-
रापेक्षया आयुधानां भिन्नत्वात् पञ्चवक्त्रसद्भावात् रुद्रशक्ति-
रस्तु वा न वेति सन्देहलेशाभावात् परमेश्वर्य्येव गायत्रीति
निरवद्यं। स्वामिन् गायत्रीशब्दार्थस्तु न परमेश्वरो रुद्रशक्ति-
र्वा किन्तु सवितुर्देवस्य वरेण्यं श्रेष्ठं भर्गः तेजः धीमहीत्यादि-
ना सूर्य्यतेजःप्राधान्यात् तन्मण्डलालयस्य नारायणस्यैव
शक्तिरिति रोचते तस्मात् चक्ररूपसद्भावात् पञ्चमुखादिकमवि-
रुद्धं। ननु अष्टमूर्त्तेः परमेश्वरस्यैव शक्तिरीदृशी कथं सूर्य्यस्य

---

१ शशमौलिः। का. पु.। स. पु.। वै. पु.।

तन्मूर्त्तित्वात् अतो रुद्रमूर्त्तिप्रतिपादिता गायत्री विष्णुशक्ति-रिति वक्तुं नार्हसि गायत्रीहृदये गायत्र्युत्पत्तिप्रकारोऽपि नितरां प्रतिपादितस्तद्यथा प्रणवात् व्याहृत्युत्पत्तिः व्याहृतीभ्यः गायत्र्युत्पत्तिः गायत्र्याः सावित्र्युत्पत्तिः सावित्र्याः सरस्वत्यु-त्पत्तिः सरस्वत्या वेदोत्पत्तिः वेदेभ्यः ब्रह्मोत्पत्तिः ब्रह्मणो लोकोत्पत्तिः एवं स्थिते प्रकृतिकार्य्ये किं चिन्त्यं। एतत्सर्व्व-स्यापि प्रणवजन्यत्वं सिद्धं भवति। प्रणवस्य तु ओमित्येतद्धृदये प्रजायतेति जन्यत्वं दर्शयति श्रुतिः। प्रणवं प्रथमं परमेश्वरा-दजायतेति भाष्येऽप्युक्तं। परस्मादात्मन एव प्रणवोत्पत्तिः सिद्धैव।

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः॥ इति।

नारायणोपनिषद्वचनान्महेश्वरस्य जगत्कारणत्वाच्च। तस्मादेव गायत्री जाता जगदुत्पत्तिहेतवे। स्वमायाप्रविष्टस्य तस्य पञ्चवक्त्रचन्द्रमुकुटविशेषणस्य शक्तिरेव गायत्रीति समाधानं वृहदारण्यके अन्तर्यामिब्राह्मणे, य आदित्ये तिष्ठन्नादित्यादन्त-रो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त अन्तर्याम्यमृत इति। यस्य परमात्मनः आदित्यः शरीरं भवति अष्टमूर्त्त्यन्तःपातित्वेनादित्यः शिवस्य शरीर-मेव। एवञ्चादित्यशरीरस्य ईशानस्य तेजोरूपा गायत्री तस्याः पञ्चवक्त्रचन्द्रचूडत्वाद्युपपन्नं। अतः चक्राद्यायुधविशेषत्वात् रुद्रत्वाद्युपपन्नमेव। तस्माद्देवतान्तरत्वेनैव गायत्र्युपासनीया

वैष्णवेन। तथैवाग्निरपि परित्याज्यः तस्य रुद्रत्वात् अष्टमूर्त्यन्तःपातित्वात् यो रुद्रो अग्नौ योऽप्सु य ओषधिषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमोऽस्त्विति श्रुतेः। रविस्तोमानमूर्त्तिरिति प्रतिपादित एव। तस्मात् गायत्र्याऽप्युपासनं वैष्णवः कर्त्तुं नार्हसि त्वं। एवं ब्राह्मण्यनिष्पत्तावपि आतायां वैष्णवोऽस्मीति यद्गृह्येत तर्हि प्रारब्धस्यातिविचित्रत्वात् को वा भवान्नास्माकं तदुपयोगः आतिभ्रं ब्रह्मामर्थ्यादकत्वात् ज्ञानमतयम् भक्तादिषु नानामतावलम्बिनां (१) नियमातिक्रमशक्तिमतां यथा आतिभ्रं ब्रह्मयैवेत्यर्थः। तस्माद् ज्ञाने जाते संसारनिवृत्तेरेव फलं लभ्यते नित्यसंसारिणामस्माकं ज्ञानमतमिति वदतां जात्याश्रमविहितकर्म्मभ्रष्टानां किन्तु वक्तव्यं तद्वदित्यर्थः। नित्यनैमित्तिककर्म्मपरित्यागे ज्ञानमतावलम्बः तदन्यथानियमातिलम्बिनीपरिसेवने कस्य मतस्यावलम्बो भवद्भिर्वेदितव्यः, श्रुतिस्मृत्युक्तनियमच्छेदिनां ज्ञानकर्म्ममार्गद्वयभ्रष्टानां मतं किमस्तीति। उक्तञ्च

जीवन् कर्म्मपरित्यागं यः करोति नराधमः।
स मूढो नरके याति यावदाभूतसंप्लवं॥ इत्यादिना।

एवं वैष्णवमतस्य दौर्बल्ये प्राप्ते माधवाख्यो वैष्णव इदमाह। स्वामिन्याम्बरागमे तप्तशङ्खचक्रे द्विभुजे धार्य्ये तेन परमं लोकं यातीति सम्यगागमदीक्षितस्य फलं प्रतिपादितं। वैष्णवस्याप्रामाण्ये आगमस्य सुतरामप्रामाण्यप्रसक्तिः स्यात्।

---

१ ज्ञानमतावलम्बिनां। वा. पु.

तस्माद्वैष्णवमतमवश्यमङ्गीकर्त्तव्यमित्यपोद्यते । आगमोक्ततप्तशङ्खचक्रधारणमयुक्तं वेदविरुद्धत्वात् मन्वादुरायणैः पूर्वभाविनो वेदस्य विरुद्धत्वे प्रोच्यमाने महानेव दोषः प्रसज्येत् तद्विरुद्धाचारे तथैव (१) स्वयंप्रणीतागमविरुद्धमपि तथैवेति चेन्न आगमेतिहासपुराणोक्ताचारस्तु वेदानुकूलत्वाद्ग्राह्यः, अग्राह्य एव तत्प्रतिकूलः । उक्तञ्च

अतीन्द्रियार्थविज्ञाने प्रमाणं श्रुतिरेव हि ।
श्रुत्युक्ताचारतो ग्राह्य आगमानां प्रसज्यता ॥ इति ।

अतः सर्वस्यापि वाङ्मयस्य निगममूलत्वेन तद्विरुद्धत्वेन वै ग्यवस्थायाग्राह्यत्वं प्रसक्तं भवति अतः परित्यक्तचक्रादिचिह्नः त्वमद्य प्रतिष्ठितं ब्राह्मणाचारं निर्वर्त्तय यथाशक्तिकर्माचरणेनापि प्रत्यवायाभावात् । श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितादित्युक्तेः । तस्मात् ब्राह्मणस्य यथोक्तकर्माचरणमेव तपः । तेन तपसा यस्तप्ततनुर्भवति स एव तप्ततनुः तस्य अतप्ततनोः पुरुषस्य तद्दाम तद्धामेत्यर्थः । तत्र भगवतो धाम तेजः अश्नुते न विना विद्यत इत्यर्थः । ज्ञानमृते मोक्षो न भवति तस्य मनोनैर्मल्यमूलं निर्मलेन मनसा संसारकारणस्य भेदस्य निवृत्तेः । ततः परमहमस्मि ब्रह्मेति महावाक्यस्य निष्पन्नत्वात् परं मोक्षमाप्नोति इति सिद्धान्तः ।

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
सम्पश्यन् ब्रह्म परमं याति नान्येन हेतुना ॥ इति श्रुतेः ।

---

१ तथैव स्वयंप्रणीतागम विरुद्धापि । सै. पु. ।

एवं भावनया तत्सत्यज्ञानानन्तलक्षणलक्षितं ब्रह्म समविन्दत् पाञ्चरात्रागमदीक्षितो माधवः ।

यः परं ब्रह्म सर्व्वात्मा विश्वस्यायतनं महत् ।
सूक्ष्मात् सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत् ॥ इति श्रुतेः ॥

तस्मात् मायाकल्पितचक्राद्यङ्कनादिकं परित्यज्य शुद्धाद्वैतदृष्ट्या जीवेशैक्यं कुरु मुक्तो भवसीति,बोधितः त्यक्तचिह्नः परिवर्जितागमाचारः सन्मार्गगामी माधवः स्वकुलग्रामदेशवासिभिः सह शुद्धाद्वैतदृष्टिं प्राप्य स्नानसन्ध्याग्निहोत्रस्वाध्यायवैश्वदेवातिथिपूजापरायणः सर्व्वं जगद्रूपेणावगतं ब्रह्मेति ध्यात्वा तथैवाहमस्मीति मुक्तोऽभवत् । इत्यनन्तानन्दगिरिकृतौ पाञ्चरात्रागमनिबर्हणं नामाष्टमं प्रकरणं ॥ * ॥

नवमं प्रकरणं।

एवं परिहृतेषु भक्तभागवतवैष्णवपाञ्चरात्रिषु पुनरन्यो वैखानसमताचारः व्यास इति प्रत्यवतिष्ठते मन्त्रवर्णम् स्वामिन् भवता निरस्ताः भक्तादयः चत्वारः तन्त्रज्ञानमार्गवर्त्तिनस्तु इदानीमहमागतोऽस्मि व्यासदासः वैखानसमताचाराग्रणीः न च भवतापि मत्पक्षं निवारयितुं कुशलः मदीयमतेऽस्य नारायणस्य सर्व्वोत्कृष्टत्वात् शङ्खचक्राद्यङ्किताङ्गैरुपदिष्टोऽयं विष्णुः सर्व्वोत्तम इति अतस्तन्मतस्य श्रुतिरुद्धत्वञ्चेति तथा मन्त्रस्तु। तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततं। तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते। अस्यार्थः। सूरयः विद्वांसः विष्णोः नारायणस्य तत्प्रसिद्धं परम पदं उत्कृष्टं स्थानं वैकुण्ठाख्यं सदा सार्व्वकालिकं पश्यन्ति तथाविधस्थानं कदा वयं प्राप्स्याम इति पश्यन्तीत्यर्थः तत्पदं किम्विधं दिवि द्युलोके आततं विस्तृतं चक्षुरिव वर्त्तमानं

चक्षुषोऽधिदैवतं सूर्य्य इव प्रकाशमानमित्यर्थः विप्रासः ब्राह्मणा विगतं पन्यं पापं येषां ते विपन्यवः जागृवांसः विगतनिद्राः निद्रालस्यादिनिन्द्यगुणरहिता इत्यर्थः विष्णोः नारायणस्य परमं सर्व्वापेक्षया पूज्यं पदं स्थानं यदस्ति तत् समिन्धते ध्यायन्तीत्यर्थः । तस्मात् सर्व्वदेवस्थानापेक्षया विष्णुपदस्य श्रेष्ठत्वात् । अनेन हि नारायणस्य सर्व्वोत्तमत्वं सिद्धमेव । नारायणाद्ब्रह्मा जायते रुद्रा वसव इत्यादिना नारायणोपनिषदुक्तप्रकारेण सर्व्वदेवकारणत्वं नारायणे घटते । अन्तर्बहिश्च तत् सर्व्वं व्याप्य नारायणः स्थित इत्यादिना नारायण एव परं ब्रह्म नराणां समूहो नारं तत्रायनं स्थानं यस्य नारायणः रेफात्परं नकारस्य णत्वविधानात् सर्व्वप्राणिबुद्धिगुहानिवासाच्छुद्धचैतन्यमित्यर्थः । तस्मान्नारायणभक्तानां तदङ्कधारणमुचितमेव । वैखानसो विष्णुभक्तो विरचितोर्द्ध्वपुण्ड्रः शङ्खचक्राभ्यां पवित्रगात्र इति । अतः शङ्खचक्रोर्द्ध्वपुण्ड्राद्यङ्कितः विष्णुभक्त इति शास्त्रे प्रोच्यते । श्री व्यासदास भवदुक्तमन्त्रद्वये विष्णुलोकस्य तेजोरूपत्वं विद्वत्प्रार्थ्यत्वं प्रदर्शितं । मायातीतस्य परमात्मनः सकाशात् प्रजा गुणत्रयमयी किल प्रजायत ततः महत्तत्त्वं तस्मादहङ्कारस्त्रिगुण उत्पन्नः । विष्णुपुराणे ।

वैकारिकस्तामसश्च भूतादिश्चैव राजसः ।
त्रिविधोऽयमहङ्कारो महत्तत्त्वादजायत ॥

इति वचनबलात् तस्य मन्त्रविष्णुत्रिवात्मकत्वं प्राप्तं ।

ते सृष्टिस्थितिलयकर्त्तारः तस्मात् पालनकर्त्ता विष्णुरित्युच्यते। व्यापकस्य पालनत्वेनैव सिद्धे सर्व्वभूतबहिरन्तःस्थितत्वेन नारायण इति नाम तस्य भाति। अतः पालनकर्त्तुर्विष्णोः पदं स्थानं सदा पश्यन्ति सूरय इत्युक्ते का वास्माकं हानिः। पालनकर्त्ता वा परब्रह्म वा विष्णुर्भवतु न चास्माकं तत् क्लेशः सर्व्वेषां देवानामात्मैकायनमिति बृहदारण्यकश्रुतेः परब्रह्मणः सर्व्वदेवमयत्वात् तस्मादोँकार उत्पन्नो गुणत्रयसमाक्रान्तैरिति। स मायाधतन एव। उत्पन्नस्य प्रणवस्यार्णाः अकारोकारमकाराः परो विन्दुः तस्मात् मकारः तस्मादुकारः तस्मादकार इति प्रवृत्तिक्रमः निवृत्तिक्रमस्तु अकार उकारे लीयते उकारस्तु मकारे मकारो विन्दौ विन्दुरजायां सा परब्रह्मणि इति व्यवस्थितिः। एवम्भूतप्रणवोऽथ रुद्रविष्णुब्रह्माणः लयस्थितिसृष्टिकर्त्तारः तेषां मेरुशिखरेषु लोका वर्त्तन्ते ते तु तत्तदुपासकानां प्राप्याः सगुणत्वादनित्यत्वाच्च यः सोऽहं ब्रह्मास्मीत्यात्मानमद्वितीयं वेद तस्य पुनः संसारप्राप्तिर्नेति किल सिद्धान्तः। भवान् विष्णुभक्तः तत्प्रीत्यै नित्यकर्म्म कुरु ब्राह्मणानां कर्मप्राधान्यात्, नहि तप्तचक्रादिधारणं कुरु तत्र प्रमाणाभावात्। आगम एव मानमिति यद्यप्युच्यते तथा न वक्तव्यं। आगमस्य खण्डद्वयात्मकत्वात् पाशुपतोऽपाशुपतश्चेति। कीदृक् पाशुपतः निगमानुकूलखण्डस्तावत् ग्राह्यः। अयाह्यस्तद्विरुद्धः। विरुद्धोऽप्यागमस्य प्रामाण्याद्ग्राह्य इति यद्युच्यते तर्हि ब्राह्मण्यहानिः स्यात् न सुरां पिबेत न कलञ्जं भक्षयेत् न परदारां गच्छेत्

नासीनु दासयेदित्यादिनिगमनिषेधेषु आगमबाहुल्यस्याचा- रोपदेशे वर्त्तते निगमविरोधोऽप्यस्तु आगमबलात्सदाचारनिष्ठां करोति यदि तत्प्रतिग्राही भवति तदा स पतितो भवति, तस्मा- न्निगमस्य बलवत्त्वेदिनो गतिरिहामुत्रापि न विद्यते अतस्तप्तचक्रादि- धारणं न युक्तमिति एवमाचार्य्यैः प्रतिपादिते व्यासदास इदमु- वाच स्वामिन् यथागमाचारः प्रमाणं पूर्व्वस्मिन् युगे दत्तात्रेयः परमयोगविदपि पञ्चमुद्रामुद्रितः कथमासीत् तस्मात् महद्भिः परिगृहीतो मार्गः शङ्खचक्रादिधारणपरः स्वीकर्त्तव्य एव किञ्च पुराणेषु च दर्शनात् । यत्र यत्र वैष्णवधर्म्मा उक्ताः तत्र तत्र चक्राद्यङ्कनं पुरःसरमेव वर्त्तते तद्द्वाराऽपि तदङ्गीकारः सिद्ध इति भगवच्चिह्नाभावे वैष्णवत्वहानेः । तस्मात् भगवच्चिह्न- धारणमवश्यं कर्त्तव्यमिति पूर्व्वपक्षे प्राप्ते तत्राचार्य्यैरिदमुच्यते । व्यासदास भवदविवेकः किमु वक्तव्यः, मुद्राङ्किततनुः दत्तात्रेय इति केन श्रुतं, तस्य मुद्राङ्कने किमु प्रयोजनं परमयोगविद- स्तस्य भूतजयवृत्तिनिष्ठस्य नियमाभावात् स्वगात्रनिष्ठपञ्ची- कृतपञ्चभूतानि अपञ्चीकृतभूतेषु संयोज्यते कस्मिंश्चिदपि अहमत्रस्य इत्युत्तरं जल्पं नास्ति तस्य महायोगिनः वहिरङ्गेन किं प्रयोजनमस्ति (१) बाला अपि जानन्ति । किञ्च सर्व्वभूता- नि स्वान्तः सर्व्वभूतान्तः स्वं च ध्यायतः जीवन्मुक्तस्य दत्तात्रेयस्य

१ वहिरङ्गेन प्रयोजनमस्ति न वेत्ति । क. पु. । ना. पु. । बै. पु. ।

चिह्नेन प्रयोजनं । किञ्च स्वाविर्भूतकालादेकादशाब्दमितं (१) अष्टादीनां समाप्य द्वादशदलपद्मदललिखितबीजमन्त्रार्था-दि-(२)-विदितमद्गुरुनिबर्हणहेतुकालसङ्कर्षणीविद्याकोविदस्य परमयोगिनः किं बहिरङ्केन । किञ्च करपुटिमन्त्रराज-विदितसकलजगन्नाथस्य बहिःप्रपञ्चेन मायाकृतचिह्नेन न हि किञ्चित् । अष्टभूतसमन्वय (३) सर्वदेवपूज्यस्य किं बहिर-ङ्केन, तस्माच्चक्राङ्कनकरणं कार्यमिति मन्दबुद्धिं दुराचारम्-कृतां परित्यज्य विगतचिह्नः सुखेन वर्त्तय। पुराणेषु भगवद्भ-क्तानां भगवच्चिह्नधारणं अनभियुक्तं न हि तदप्यहो । कथं को वा प्रह्लादस्य चक्राङ्कनं कारयामास नृसिंहाविर्भावमूलत्वात् विष्णु-भक्तिरस्तीति किमु वक्तव्यः । गजेन्द्रः केन चक्राङ्कितः तस्यार्त्ति-परिहाराय चक्रहस्तो विष्णुः कथमागतः । विभीषणस्य को वा बहिश्चिह्नमाचकार (४) रामः शाश्वतलङ्काधिपत्यं कथमददात् । ध्रुवः केन लिङ्गभृत् तस्य ब्रह्माण्डपर्यन्ते स्थितिः कथमा-सीत् । द्रौपदी केन चिह्नेनाङ्किता तस्याः स्मरणमात्रेण वस्त्र-चयदाताऽभूत् । अतो व्यासदास मूढबुद्धिं परित्यज्य बहिर्लिङ्ग

---

१ स्वाविर्भूतकालादेकादशाब्दमितं । सं. पु. । का. पु. । तै प. ।

२ द्वादशदलपद्मदलबीजमन्त्रादिविदित । बा. पु. । स प. का. पु. ।

३ अजस्रेऽप्यधिकः । बा. पु. ।

४ बहिश्चिह्नमाचकार । बा. पु. ।

त्वक्का चर्म्मविकारसाधनं सोऽहमनेन तप्तचक्रादिकेन परमेश्वरमाराधयामीति भगवच्चिह्नं धारयितुमिच्छसि तर्हि भगवद्देहनिष्ठं चिह्नं वा उत भगवद्भक्तचिह्नं वा नाद्यः भगवद्देहे वक्षःस्थले लक्ष्मीकौस्तुभचिह्नं उदरे चतुर्दशभुवनचिह्नं पादादिनाभिपर्य्यन्तमधोलोकचिह्नम्, ऊर्द्ध्वमूर्द्धचिह्नमक्ष्णोः सूर्य्यचन्द्रचिह्नं जिह्वायामनन्तवेदचिह्नं एवमनेकचिह्नानि भगवद्देहे वर्त्तन्ते समर्थश्चेत् तच्चिह्नावलम्बनं कुरु। यस्य कस्यापि मनुष्यस्य भगवद्देहचिह्नालम्भवात् प्रथमपक्षो दूषितः। न द्वितीयः। भगवत्करनिष्ठायुधचिह्नस्यायत्नालम्भत्वात्। तदाकाराकारितलोहिताङ्कितं (१) चेत्। यस्य कस्यापि विष्णुचक्रदर्शनाभावात् शङ्खस्य च तथात्वात् यथेच्छालोहतापोऽत्र विवक्षितो भवति न हि तेन किञ्चित् प्रयोजनं चर्म्मदाहनिष्ठे चक्रस्य वर्त्तुलत्वं। शङ्खस्य च पृथगाकारत्वं (२) लोहेन परिकल्प्य कणाङ्गारेषु (३) तप्तं कृत्वा ताभ्यां भुजयोरङ्कनं कारयामीति चेत् मूर्द्धजनसम्प्रतीतिः (४) स्यात्। तथा चेत् विष्णुतल्पं शेष इति विष्णुवाहनं गरुड इति च लोहेन तद्रूपं च कृत्वा ताभ्यां चाङ्कनीयं भुजद्वयं शङ्खचक्राभ्यामङ्कितं एतद्वन्द्वं कुर्वेत्युक्ते कपोलयुगले गले ललाटे भुजापेक्षया ऊर्द्धकायस्य श्रेष्ठत्वात्, तत्र श्रामे-

---

१ तप्तलोहचिह्नमिति। वै. पु.।

२ तथात्वादित्यधिकः। का. पु.। स. पु.। वा. पु.।

३ कङ्केषु। स. पु.। वा. पु.। कां. पु.।

४ प्रीतिः स्यात्। का. पु.। वा. पु.। स. पु.।

न्द्रियचाक्षुषस्य कर्मेन्द्रियपाय्वादये वाञ्छन्ते विक्षिते ज्ञाने-न्द्रियवाञ्छिते कर्मेन्द्रियगते च सति ज्ञानकर्मभ्यां विना पशुवद्धन्तुमुचितो भवति । विधिनिषेधात्मकरज्जुद्वये भग्ने बन्धनिवृत्तिः स्यात् । तस्मात् ज्ञानकर्मस्वरूपबन्धनिवृत्तौ आत्मायां यथेच्छाविहरणशीलत्वं युक्तमेव परत्र यमादिभ्यो जितोभयलोकस्य तव किं भयं विद्यते । वैष्णवोपाधिना स्मार्त्त कर्मपरित्यागं कुर्वतस्तव शङ्खचक्रधारणमात्रमेवावशिष्यते नैत्यग्निहोत्रादिकं कर्म । अतः शुद्धवैष्णववृत्तिमाश्रित्य त्वं स्वस्थो भवेत्युक्तः व्यासदासः श्रीमच्छङ्कराचार्यमिदमब्रवीत् । स्वा-मिन् यतिवर्य भवत्कृपया आत्मविवेकोऽस्मि नाहं चक्राद्यङ्कितः किन्तु मद्गुरुस्तदङ्काङ्कित इति श्रुतं, वैखानसमतमवलम्ब्य कि-ञ्चित्तत्त्ववर्त्तिनं (१) मां शुद्धाद्वैतवर्त्तिनं कुर्विति विज्ञाप्य द-ण्डवदभिवाद्य उत्पुटितकरद्वयमौलन्नशिरस्कं व्यासदासं दृष्ट्वा करुणासमुद्रः श्रीशङ्कराचार्यः प्रहसन् तं इदमाह शृणु व्यास-दास भवतस्त्वनायासेन मुक्तिकारणं ।

ब्रह्मैवाहं न संसारी मुक्तोऽहमिति भावय ।
तस्मिन्निधावशकस्य वाक्यमेतदुदीरय ॥
इत्यभ्यास-(२)-परित्यक्तद्वन्द्वषडूर्मिकः ।
विदित्वा परमात्मानं मुक्तो भवसि नान्यथा ॥

---

१ किञ्चित्तत्ववर्त्तिनं । तै. पु. ।

२ ह्यभ्यास । का. पु. । ब. पु. । तै. पु. ।

इति सम्बोधितः शिष्यः कृतार्थोऽहमितीरयन्।

ब्रह्माहमिति संजानन् यतो स्वकुलसंयुतः॥

इत्यनन्तानन्दगिरिकृतौ वैखानसमतनिमर्दनं नाम नवमं प्रकरणम् ॥ * ॥

दशमं प्रकरणं।

एवं परिहतेषु भक्तभागवतवैष्णवपाञ्चरात्रवैखानसेषु पुनरन्यः कर्महीनः प्रतिपक्षः समागतो ऽभवत् नामतीर्थ इति। स तु श्रीशङ्कराचार्य्यं दृष्ट्वा इदमुवाच।

भोः स्वामिन् चिरकालनिष्ठाभ्यासपटिष्ठा (१) भक्तादयः श्रीमद्भिर्निरस्ताः खलु इतःपरमागतं हणीकृतकर्म्माणं विष्णुदासापरव्यं नामतीर्थं मां विद्धि, विष्णुरेव गतिरिति निश्चितवता मया साधनान्तरं मन्त्रान्तरं गुर्व्वन्तरं दैवतान्तरं परमपि न दृष्टं सर्व्वं विष्णुमयं जगदिति गुरूपदेशात् गुरुरेव मोक्षदः तदानीं भगवन्तमेवं प्रार्थयेत् इमं मत्कृत्यं निजपदारविन्दं प्रापयेति। एवं मद्गुरुनिरुक्तो (२) भगवानपि तथा करोति तस्मान्मम पुनर्जननहेत्वभावात् जीवन्मुक्त एव मत्कृतमन्यथा कर्त्तुमसमर्थः त्वमपि अतः सर्व्वं मत्संशयाः कर्महो-

१ निष्ठाभ्यासपदीराङ। वा. पु.। का. पु.। ध. पु.।

२ मद्गुरुभिरुक्तो। वा. पु.। स. पु. का. पु.।

वेति सुलभमन्यदेवं विष्णुमयलभ्यां भक्तोऽपि मुक्तो भविष्यतीति नामतीर्थे नैवमुक्तः परेकथितः श्रीमच्छङ्कराचार्य इदमात्र मे नामतीर्थे मुकुन्दोऽपि किञ्चिदपि वाक्ये मुखकुले वासं कृत्वा भवता मन्दबुद्धिना साधीतं । कर्मभ्रष्टस्य भवतः जीवन्मुक्तिदेश उच्यमुक्तं तावत्, ज्ञानिनः प्रवृत्तिर्बालोन्मत्तपिशाचवत् किल लोके भवितव्या अतो भवद्भिरपि निन्द्यानिन्द्यं विना पिशाचवदभवत् (१) । लोके मार्गद्वयं वर्त्तते कर्ममार्गः ज्ञानमार्गश्चेति, तत्राद्यः स्वर्गादिकामनया श्रुतिस्मृत्युक्तकर्मकरणं । ज्ञानमार्गो नाम वेदोक्तसर्व्वकर्म्माणि कृत्वा तत्फलसमर्पणं भगवति परमेश्वरे कर्त्तव्यमिति पूर्व्वमुक्तं । कर्म्मफलपरित्याग एव ज्ञानमार्गः ऋजुमार्गः । तस्मान्मार्गद्वयाद्भ्रष्टं त्वां दण्डनं कर्त्तव्यं । ब्राह्मणः कर्म्म कुर्य्यादित्यादिप्रमाणवचनानां सद्भावात् । एकदिनसन्ध्यातिक्रमदोषपरिहारः प्राजापत्यकृच्छ्रत्रयेण भवति, बहुवर्षेषु गतेषु भवद्दुःखायं किमु वक्तव्यं । कर्म्मबहिष्कृतस्य विष्णुभक्तावपि अधिकारो नास्त्येव । एतच्च भागवते भगवद्भक्तस्य लक्षणं ।

न चलति निजवर्णधर्मतो यः
समनिरात्मसुहृद्विपक्षपक्षे ।
न जहति न चलन्ति केचिदुच्चैः
सततमनु तमवेहि विष्णुभक्तं ॥ इति ॥

तस्मान्निजवर्णधर्माच्चलितस्य तव भाक्तत्वाभावात् सुतरां

१ वर्त्तमान पिशाचवदभवत् । श्री. मु. ।

विष्णुभक्तिर्नास्त्येव। कर्मप्रतिपादकानां भगवदाज्ञारूपाणां वेदानामुल्लङ्घनात्।

श्रुतिस्मृतिसदाचारा आज्ञारूपा हि मे मताः।
आज्ञाच्छेदी मम द्रोही स याति नरकं सदा॥ इति॥

भगवद्वचनात् श्रुतिस्मृती भगवदाज्ञे अतो भगवदाज्ञाच्छेदिनस्तव तद्भक्ताधिकारमात्रं च न। गायत्रीमन्त्रस्य ते ब्राह्मण्याभावात् मन्त्रान्तरमवश्यमङ्गीकर्त्तव्यं साधनान्तरं जातकर्मादिकर्म गुर्वन्तरञ्च देवतान्तरं अग्निर्देवो द्विजातीनामिति वचनात् अग्निपरित्यागे कृते पतितो भवति एवं चतुर्णां विद्यमानत्वात् तदनुष्ठानाभावे महापातकदर्शनाच्च। ब्रह्मचारी गृही वनस्थः केन धैर्य्येण कर्मत्यागः कर्त्तुं शक्यते परमहंसमन्त्रादि विना तेषां विधिदर्शनात्। "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरिति।" तस्मात्त्वं सभां गत्वा द्वादश प्रदक्षिणनमस्कारान् कृत्वा ममस्तापराधं क्षमस्वेति विश्वासपूर्वकं सम्प्रार्थ्य ब्रह्मदण्डं समर्प्य ब्राह्मण्यं सम्पाद्य कृतार्थो भव इति श्रीशङ्कराचार्य्योक्तः नामतीर्थः यथाभयनेन श्रीगुरुं प्रीतं कृत्वा ब्राह्मणकर्मशीलः सगणोऽभवत्। तत्तन्मतशामवादिभिः स्वस्वसिद्धान्तनिरसनमाचार्य्यकृतं दृष्ट्वा सर्वे कृतप्रायश्चित्ताः त्रिपुण्ड्रधारिणः पञ्चयज्ञपञ्चपूजापरायणाः अद्वैतमतावलम्बिनो निगमाचारपरतन्त्रा बभूवुः। इत्यनन्तानन्दगिरिकृतौ कर्महीनवैष्णवमतनिबर्हणं नाम दशमं प्रकरणं॥ १०॥

एकादशं प्रकरणम् ।

तदनन्तरमनन्तशयनात्पश्चिममार्गेण पञ्चदशदिनैः सुब्रह्मण्यं नाम कुमाराविर्भूतस्थलं सकलशिष्यैः सेवितः श्रीशङ्कराचार्य्यः परमहंसगुरुः प्राप ।

स्नात्वा कुमारधारायां नद्यां शिष्यसमन्वितः ।
भक्त्या संपूजयामास षण्मुखं शिवरूपिणं ॥
काषायवस्त्रदण्डाढ्यः कमण्डलुलसत्करः ।
भूतिभूषितसर्व्वाङ्गो बभौ रुद्र इव स्वयं ॥
नानादेशस्थविप्रौघाः सुब्रह्मण्यं समागताः ।
दृष्ट्वा तं शङ्कराचार्य्यमिदमूचुः सुविस्मिताः ॥

स्वामिन् ब्राह्मणा वयं ब्रह्मकुलजाः किन्तु मन्वादिस्मृत्युक्ताचारशीलाः हिरण्यगर्भोपासनपरिलब्धमनःस्थैर्य्याः सर्व्वं ब्रह्मनिर्मितं जगदिति ब्रह्मण एव सृष्टिस्थितिलयकर्त्तृत्वं निश्चय कृत्वा वसामः (१) हिरण्यगर्भस्य जगत्कारणत्वं तच्छास्त्रानामैक्य श्रुतिसिद्धः । तथाहि ।

---

१ ब्राह्मणा वयं मन्वादिस्मृत्युक्ताचारशीलाः हिरण्यगर्भ एव जगतः सृष्टिस्थितिलयकर्त्तेति निश्चित्य तदुपासनपरिलब्धमनः-स्थैर्य्याः सन्तोऽत्र वसामः । स. पु. । क्वचित् ।

हिरण्यगर्भः समवर्त्तताग्रे
भूतस्य जातः पतिरेक आसीत् ।
सदा धार पृथिवीन्द्यामुतेमा-
कस्मै देवाय हविषा विधेमः ॥ इति ।

एतदुचा हिरण्यगर्भः चतुर्मुखो ब्रह्मा अग्रे जगदादौ समवर्त्तत । भूतस्य आकाशादिप्रपञ्चस्य पतिः स्वामी तस्मादेव आकाशाद्युत्पत्तिरित्यर्थः । अयं हिरण्यगर्भः एक एव जातः परब्रह्मणः निर्गुणात् सत्यज्ञानानन्दलक्षणादाविर्भूतः एक एव हिरण्यगर्भ इत्यर्थः । स चादावेक एवासीदिति एवकारः इतरसत्तामात्रनिवृत्तिकरः । स पृथिवीं उत द्यां दिवि इमां सदा धार सततं धृतवानित्यर्थः । तादृशं ब्रह्माणमृते कस्मै देवाय हविषा विधेमः । अतः सर्व्वकर्तृत्वविभोक्तृत्वं ब्रह्मणा एव घटते । किञ्च सर्व्वदेवापेक्षया ब्रह्मण एव परमत्वं श्रूयते । "ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मेति" दिरुक्त्या एतदपेक्षया परं नास्तीत्यर्थः । किञ्च वल्लीोपनिषदि । सैषानन्दस्य मीमांसा भवतीत्युपक्रम्य स एको ब्रह्मण आनन्द इत्यन्तेन ग्रन्थेन सर्व्वापेक्षया ब्रह्मानन्दस्य श्रेष्ठत्वं दर्शितं तत्परानन्दस्याभावात् । स चतुर्मुखः तत् सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवदिति श्रुतेरयमर्थः । तत्कार्य्यरूपं जगत् सृष्ट्वा उत्पाद्य तदेव स्वसृष्टमेव अयमेव एतकारो देहलीदीपन्यायेन तथानुप्राविशदित्यनेन सम्बध्यते अनुकार्य्यं सृष्टिमनु प्रविष्टोऽपि ब्रह्मा तत्प्रपञ्चमनुप्रविश्य सच्च तेजोऽत्थ तद्रूपं(१)त्यच्च वाय्वाकाशरूपं चकारात् पञ्चभूतरूपशरी-

१ तेजोबन्नरूपं । वा. पु. ।

रामगतब्रह्मादिप्रेरकजीवरूपस्य जगवत्। तद्वक्षो प्रजायेयेत्य:-
दिवचनेभ्यश्च सर्व्वप्रपञ्चस्य ब्रह्मस्वरूपत्वं ब्रह्माधारकत्वञ्च निष्ट-
निरश्याया ब्रह्मणेव सयत्नञ्च सिद्धं भवति। अतः सर्व्वेश-
प्रतिपाद्यमानस्य श्रेष्ठत्वात्मस्य दक्षिणवामवाहुभ्यां विष्णुरुद्रो-
त्पत्तिदर्शनात् तद्भक्ताश्च तत्सम्बन्धिकमण्डलुकूर्च्चादिविङ्गिताः
कर्म्मज्ञानमार्गद्वयावलम्बिनः क्रमात् कमण्डलुकूर्च्चाद्धिधारिणो
वा अर्म्मादिविहोमविधिकर्म्मविप्रविधि- (१) श्रुहन ब्रह्मकम-
ण्डलुकीर्त्तियाग-(२) कूर्च्चब्रह्मवेदिगृहतनुविविमतविधिवेदपा-
ठिनिगमब्रह्म-(३) श्रुतिपारीण-(४) निगममुनिस्वाध्यायधर्म्म-
ब्रह्मकर्म्मदेवकर्म्ममुनिकर्म्मयुगपितामहगृहपरमेष्ठिद्विजपितामहा-
द्यः वयं भवन्तं सर्व्वेश यतिपतिमीड्य कृतार्थाः स्मः। कि-
ञ्चिदस्माभिर्विज्ञापितमवधारय किमेतेन प्रयोजनं। प्रथमजीवा-
द्धिरण्यगर्भात् सर्व्वे जीवाः जाताः। पुनः पुनः कर्म्मविकारैः जन्म-
मरणप्रवाहक्षीनानपि प्रभुर्भत्वा सर्व्वे एतान् (५) सर्व्वान् सक्षू-
मान् ब्रह्माण्डाद्विमरे (६) स्वोदरे निवेश्य स्वयमेक एव वर्त्तते

---

१ कर्म्मविधिविप्रविधि। ते. पु.।

२ कीर्त्तिमार्ग। वा. पु.।

३ निगम सूत्रि। ते. पु.।

४ श्रुतिपारीणां। वा. पु.। म. पु.। का. पु.।

५ प्रवाहक्षीना अपि प्रभुर्भत्वा सर्व्वे ताम्। वा. पु.। का. प. । म. पु.।

६ ब्रह्माण्डान्तरे। वा. पु.।

दृष्टो पुनस्तान् स्वकर्मगोलान्तःस्थान् निजप्रकाशया (१) संयुज्य जन्ममरणप्रवाहसन्तानकरोदिति मद्गुरुभिरुपदिष्टः परमार्थः । ब्रह्मकुक्षिप्राप्तकालो मोक्ष एव तथा च (२) ब्रह्मविदाप्नोति परमिति श्रुत्या चतुर्मुखस्वरूपज्ञानेन तन्मूर्त्त्युपासनेन च ब्रह्मवित् ब्रह्मस्वरूपज्ञ इत्यर्थः (३) परं मोक्षमवाप्नोति ब्रह्मलोके विष्णुरुद्रादिदेवगोचरे चतुर्मुखकमण्डलुकूर्चादिचिह्नधरो मुक्तः क्रीडति तस्मात् भवान् कमण्डलुहस्तपाणिः ब्रह्मलोकार्थेभ्य एव महीयस्त्वेहात् विशेषात् भवतोति हैरण्यगर्भैरुक्तः परमगुरुः श्रीशङ्कराचार्यः पठति ।

यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति ।
यत् प्रयन्त्यभिसंविशन्ति तद् विजिज्ञासस्व तद्ब्रह्म ॥ इति ॥

ज्ञानार्थिनं भृगुमुद्दिश्य मित्रावरुणेनैवमुक्तं । इमान्याकाशादीनि पञ्च महाभूतानि भौतिकदेहोपेतहिरण्यगर्भादिस्तम्बान्ताः सर्वे प्राणिनः यतो वस्तुनः जायन्ते । वै शब्दः स इमान् लोकानसृजतेत्यादिश्रुत्यन्तरप्रसिद्धद्योतनार्थः । उत्पन्नानि च भूतानि येन वस्तुना जीवन्ति स्थितिं लभन्ते प्रयन्ति विनाशं प्रतिपद्यन्ते इमानि भूतानि यदन्त्वभिसंवि-

---

१ दृष्टो पुनस्तावत् स्वकर्मगोलान्तःस्थनिजप्रकाशया । बा. पु. । स. पु. । का. पु. ।

२ इतरथाधि । बा. पु. । का. पु. । स. पु. ।

३ ब्रह्मस्वरूपवित् ब्रह्मस्वरूप इत्यर्थः । बा. पु. । स. पु. । का. पु. ।

यन्ति साकल्येन प्रविशन्ति यथा फेनतरङ्गबुद्बुदानामुत्पत्तिस्थितिलयाः समुद्रे भवन्ति तद्वज्जगदुत्पत्तिस्थितिलयकारणं वस्तु विचारय तदेव वस्तु त्वया * दृष्टं ब्रह्म तस्य लक्षणन्तु 'सत्यं ज्ञानमनन्तं ब्रह्मेति' सत्यं सर्वविकारार्थविलक्षणं (१) तर्हि भावरूपं जडमित्यत आह ज्ञानं जडविलक्षणं यस्त्वभावविलक्षणो भावविशेषस्तर्हि घटादिकमपि तथेत्यत आह अनन्तं देशकालवस्तुपरिच्छेदशून्यं एतावत्युच्यमाने भावः स्यात् । श्रुतौ व्यवच्छेदार्थमाह सत्यमिति सत्यमनन्तमित्युच्यमाने जडमपि स्यात् तद्व्यावृत्त्यर्थं ज्ञानमित्याह यद्यपि ज्ञानमनन्तमित्युच्यमाने सत्यपदस्य न कृत्यं ज्ञानस्याभावविलक्षणत्वात् तथापि ज्ञानमसदिति सर्वासद्वादिनः सङ्गिरन्ते तत्पक्षाधिक्षेपार्थं सत्यमित्याह (२) । अयं भावः येनाऽपि सर्वासत्त्वमङ्गीक्रियते तेनाप्यङ्गीक्रियत एव सत्त्वमन्यथाऽसत्त्वे सत्त्वस्यानुपपत्तेः । ततो निरपेक्षत्वादिति हेतुभ्यः सत्त्वमङ्गीकरणीयन्तथा तादृशसत्यत्वं जडवैलक्षण्यञ्च स्वयंप्रकाशमानानन्दात्मन एव विद्यया सकलदुःखनाशदर्शनादिति चेत् ज्ञानमित्येवास्तु ज्ञानमनन्तपदेनापीति न मन्तव्यं अन्तःकरणविद्यावृत्तेरपि (३) ज्ञानशब्दाभिधेयत्वात् तदेव ज्ञानमिदम-

---

* वस्तुतया । वा. पु. । का. पु. । स. पु. । तै. पु. ।

१ नकारार्थविलक्षणं । वा. पु. । स. पु. । का. पु. ।

२ सर्वासद्वादिनोऽसत्त्वाधिक्षेपार्थं सत्यमित्याह ।

वा. पु. ।

३ अयं भावः येनापि सर्वासत्त्वमङ्गीक्रियते तेनाप्यङ्गीक्रियत एव सत्त्वमन्यथा सत्त्वस्यानुपपत्तेः । ततो निरपेक्षत्वादिभ्यो

षीति बुद्धिनिवारणार्थमनन्त पदस्योपयोगात् पदत्रयमूर्ति स्वरूप लक्षणमखण्डैकरसं ब्रह्म इत्येतदेवार्थभूतं (१) सर्व्वैर्मुमुक्षुभिरुपासनीयं तदिच्छाप्रकृतिप्रसूतं (२) महदादिसर्व्वं जगत्, तस्मात् मायागर्भान्तर्गतस्य हिरण्यगर्भस्य उपासनया मोक्षो नास्त्येव तस्य किञ्चित्फलदत्वात् तर्हि परब्रह्मणोऽपि मोक्षो नास्त्येव तद्विचारस्याशक्यत्वात् अतः प्राप्तमविचार्य्यमेव ब्रह्मेति उच्यते। एतद्विचारकर्त्तव्यता च भाष्ये प्रथमाध्यायस्य प्रथमपादे बहुधा चिन्तिता।

अविचार्य्यं विचार्य्यं वा ब्रह्माध्यासनिरूपणात्।
असन्देहफलत्वाभ्यां न विचारं तदर्हति॥
अध्यासोऽहंबुद्धिसिद्धो ह्यसङ्गं ब्रह्म श्रुतीरितं।
सन्देहान्मुक्तिभावाच्च विचार्य्यं ब्रह्म वै ततः॥ इति॥

आत्मा वा अरे द्रष्टव्य इत्यात्मदर्शनफलमुद्दिश्य तत्साधनत्वेन श्रवणं विधीयते। श्रवणं नाम वेदान्तवाक्यानां ब्रह्मणि

हेतुभ्यः सत्यस्याङ्गीकारकरणीये न सत्यस्येति जडवैषम्यात्
स्वयंप्रकाशमानानन्दात्मन एव विद्यया स्वकार्य्यया ज्ञाते सति दुःखानामप्यदर्शनादेवकेवल ज्ञानमित्येवास्तु तत्तमनन्तपदे मायीति न मन्तव्यं अन्तःकरणविषयस्योरपि। स. पु.। का. पु.। तै. पु.।

१ अखण्डैकरसार्थमिति। स. पु.। का. पु.। तै. पु.। मुद्रिते शेतेरर्थभूतमिति। का. पु.।

२ तदिच्छाप्रसूतं। का. पु.।

तात्पर्यं निर्णेतुमनुकूलो न्यायविचारः सदेतदित्याद्विधायक-वाक्यं विषयः शोधकयोर्वा संशयितः । सन्देहप्रयोजनयोरभावेन संशय-प्रतीतेः । ब्रह्मविचारात्मकं शास्त्रमारब्धमनारभ्यं वेति सन्दे-हः । पूर्वोत्तरपक्षयुक्तिद्वयं सर्वत्र सर्वैरपीक्षणीयम् । अना-रभ्यमिति तावत्प्राप्तं विषयप्रयोजनयोरभावात् सन्दिग्धं विदित्वा तस्य विषयो भवति ब्रह्म तु न सन्दिग्धम् । तथाहि तद् किं ब्रह्माकारेण सन्दिह्यते (१) आत्माकारेण वा । नाद्यः सत्यज्ञानमनन्तं ब्रह्मेति वाक्येन ब्रह्माकारस्य निश्चयात् । न द्वितीयः अहम्प्रत्य-येनात्माकारस्यापि निश्चयात् अध्यस्तात्मविषयत्वेन भ्रान्तोऽहं-प्रत्यय इति चेन्न अध्यासनिरूपणात् तमःप्रकाशवद्विरुद्धस्वभा-वयोर्देहात्मनोः शुक्तिरजतवदन्योन्यतादात्म्याध्यासो न निरू-पयितुं शक्यते । तस्मादभ्रान्ताभ्यां श्रुत्यहम्प्रत्ययाभ्यां निश्चित-स्यात्मनः असन्दिग्धत्वान्न विचारस्य विषयोऽस्ति नापि प्रयोजनम् पश्यामः उक्तप्रकारेण ब्रह्मात्मनि निश्चितेऽपि मुक्त्यदर्शनात् तस्मात् तद्ब्रह्म न विचारमर्हतीति शास्त्रमनारम्भणीयमिति पूर्वपक्षिभिराक्षिप्ते अत्रोच्यते ।

शास्त्रमारम्भणीयं विषयप्रयोजनसद्भावात् श्रुत्य-हम्प्रत्यययोर्विप्रतिपत्त्या सन्दिग्धं (२) ब्रह्मात्मवस्तु अयमात्मा ब्रह्मेति श्रुतिरसङ्गपदार्थं ब्रह्मात्मत्वेनोपदिशति । अहं मनुष्य इत्याद्यहम्बुद्धिर्देहादितादात्म्याध्यासेनात्मानं एका-

---

१ सन्दिह्यते । वा. पु. ।

२ विप्रतिपत्तिसन्दिग्धं । का. पु. । वा. पु. । स. पु. ।

ति। अध्यासस्य च दुर्निरूपत्वमलङ्काराय तस्मात् चिन्दाद्यं वस्तु विषयः तन्निश्चयेन च मुक्तिलक्षणं प्रयोजनं श्रुत्यादिविद्वदनुभवेन प्रसिद्धं। तस्माद्वेदान्तवाक्यविचारमुखेन ब्रह्मणो विचारार्हत्वाच्च शास्त्रमारम्भणीयमिति सिद्धान्तः। विचारस्तु लक्षणप्रमाणाभ्यामस्तु तत्त्वनिर्णयावधिकः निर्णयानन्तरमखण्डं ब्रह्म स्वयमेव भवतीति निश्चयः। परब्रह्मांशजातरुद्रविष्णुब्रह्मणां परम्पराकर्तृत्वात्तदुपासनायाः फलमयुक्तमेव।

* अतो भो ब्राह्मणाः रुद्रादिनिरूपणं परिहर्त्तव्यं। बृहन्नारदीयादिवचनविरोधात्। कूर्मादिवत् चतुर्मुखत्वादेः चिह्नस्य कर्त्तव्यत्वापत्तेश्च। हिरण्यगर्भ एव परममूलकारणमित्यप्यसङ्गतं।

यो ब्रह्माणं विदधाति पूर्वं
यो वै वेदांश्च प्रहिणोति तस्मै।
तमात्मदेवं शरणं सनातनं
मुमुक्षुर्वै शरणमहं प्रपद्ये॥ *

इत्यादिश्रुत्या ब्रह्मणः उत्पत्त्यादिश्रवणात्। जगतः परममूलं सत्यं ज्ञानमनन्तं ब्रह्मेत्यादि श्रुतिप्रतिपाद्यं निर्गुणं ब्रह्मैव। यतो वेत्यादिश्रुतयश्च तत्परा एव। अत एव हिरण्यगर्भ इति श्रुतौ जात इति पदं सङ्गच्छते। सत्यादिस्वरूपब्रह्मणः सकाशादुत्पन्न इति तदर्थः। किञ्च चतुर्मुखत्वादिसाकारोपासनायाः भेदघटितत्वेन मुक्त्यभावप्रसङ्गात्। तथा हि श्रूयते। "उदरमन्तरं कुरुतेऽथ तस्य भयं भवतीति।" जीवब्रह्मणोर्योऽन्तरमीषत् अन्तरं

भेदं कुरुते यस्य तस्य भयं संसारो भवतीत्यर्थः। तस्मात् तत्त्वमस्यहं ब्रह्मास्मीति देहिकोऽहमात्मैव बोधकवाक्यैः परित्यज्य अभेदभावनया मुक्ता भवथेति वाक्यैर्बोधितास्ते हिरण्यगर्भवादिनः जगद्विधिप्रमुखाः भाक्ताः वै तथेत्युक्त्वा आचार्यं नत्वा तथा चक्रुः ॥ (१)

इत्यनन्तानन्दगिरिकृतौ हैरण्यगर्भमतनिवर्हणं नामैकादशं प्रकरणम् ॥ * ॥

---

१ एवमप्युक्तमेव। यतो ब्रह्मकमण्डलुकूर्चादिधारणं पाशबद्धमूलकं परित्यज्य शुद्धाद्वैतपरायणाः शिष्या बभूवुः। पा. पु.

द्वादशं प्रकरणं ।

———०*०———

एवं परिहृतेषु हैरण्यगर्भेषु पुनरन्ये सुहोत्रवीतिहोत्र-कश्यहोत्रादयः अग्निमतानुवर्त्तिनः प्रत्यवतिष्ठन्ते । ते श्रीमन्नम-द्वैतमतसिद्धान्तकर्त्तारं सर्व्वज्ञं श्रीशङ्कराचार्य्यमिदमूचुः । स्वा-मिन् परमेश्वर अग्निरेवास्माकं देवता कथं मन्त्रवर्णात् ।

अग्निरग्रे प्रथमो देवतानां
संजातानाम्-(१) उत्तमो विष्णुरासीत् ।
यजमानाय परिगृह्य देवान्
दीक्षयेतद्धविरागच्छतं नः ॥ (२) इति ।

अग्रे सृष्टेः पूर्व्वकाले सर्व्वेषां देवानां प्रथमो ज्येष्ठः अग्निरेक एवासीत् तस्मात् संजातानां सम्यगग्निमनुसृत्य जातानां (३) देवा-

---

१ संयातानां । स. पु. ।

२ दीक्षयेदं हविरागच्छतं नः इति । तै. सं. । देवाग्ने तद्धविरिति तु । वा. पु. । स. पु. ।

३ ज्येष्ठः स एव संयातानां सम्यगभिमनुसृत्ययातानां । स. पु. ।

नां मध्ये विष्णुस्तत्र जायेत । यतो दीक्षिता यजमानाय देवान् परिगृह्य नोऽस्माकं हविः आगच्छतं यस्य हविः शुभं भवति तस्य तत् प्रापयतीत्यर्थः (१) । अग्निमुखा वै देवा इति मन्त्रान्तरात् अग्निर्देवो द्विजातीनामिति वचनाच्च तस्य सर्व्वोत्कृष्टत्वं प्राप्तं ब्राह्मणैस्तदुपासनार्थं क्रियमाणास्वग्नित्रि- कानां विस्फुलिङ्गरूपमणिग्रन्थाकानां (२) धारणं कर्त्तव्यमेव । ब्राह्मणोचितस्य कर्मणः श्रौतस्मार्त्तरूपस्य तत्कारणत्वात् (३) । ब्राह्मणानामस्माकं अग्निरेव देव इति सिद्धं । तस्यैव सर्व्व- पापहरत्वं नारायणोपनिषदि श्रूयते ।

उद्दीप्यस्व जातवेदो अपघ्नन् निर्ऋतिं मम ।
पशूंश्च मह्यमावह जीवनञ्च दिशो दश ॥ इति (४)

अयमर्थः । हे जातवेदः उद्दीप्यस्व मम निर्ऋतिं पापदेव-

---

१ यतो दीक्षिताय यजमानाय देवान् अवरुह्य नोऽस्माकं येषां आगच्छन्तं यस्येत्यादि । वा. पु. । यतो देवक्षये यजमानाय देवान् परिगृह्य नोऽस्माकं हविरागच्छतं प्रापयतीत्यर्थः इति तु ।

स. सु. पु. ।

२ मणिग्रन्थिकानां । वा. पु. । का. पु. । स. पु. । तै. पु. । एवं सर्व्वत्र ग्रन्थिका पाठोऽस्ति ।

३ सर्व्वोत्कृष्टत्वं प्राप्तं । तस्याविस्फुलिङ्गरूपमणिग्रन्थाकारा इत्याः तत्राप्यर्था मुक्ता भविष्यन्ति । ब्राह्मणोचितस्य श्रौतस्मार्त्त- रूपस्य तत्कारणत्वादिति । वा. पु. ।

४ दिशो दश । वा. पु. । अ. पु. । का. पु. ।

तात्पर्यम् संहरेदित्यर्थः। मह्यमेव पशूनावह। पशूनां चतुष्पदां धेनुप्रमुखानां दानं कुर्व्वित्यर्थः।

"जीवनं द्रव्य धान्यञ्च प्रियमिच्छेद्धुताशनादिति।"

वचनात् दिशः प्रागादिदिक्षु मम यत्र सुखवसतिर्भवति तद्दिशो दश देहीत्यर्थः। अतः सर्व्वैः विप्रैरग्निरेक एवोपासनीयः। तस्माद्भवन्तोऽप्यग्न्युपासनया कृतार्था भवत इति प्राप्ते।

आचार्य्यैरिदमुच्यते। नायमग्निः परो देवः। ऋग्वेदब्राह्मणे अग्नेरवमत्वदर्शनात्, अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्व्वा देवता इति। (१)

देवानां मध्ये अग्नेरवमत्वं, विष्णोर्व्यापकचैतन्यस्य ब्रह्मणः परमत्वं तदन्तरे तदुभयमध्ये अन्याः सर्व्वाः देवता इति, एवं वेदार्थे स्थिते कथमग्नेः परमत्वं वक्तुं शक्यते किन्तु देवानामवम इति देवानां पुरोहितः हविर्भागित्यर्थः। कर्म्मण एवाग्निर्देवता न तु ज्ञानस्य। तथा हि कर्म्मद्वारा ज्ञानकारणमपीति चेत् तस्य श्रुतेन (२) अन्यत्वश्रवणात् गृहस्थानां श्रौतादिकर्म्मणि प्राप्ते सत्युपास्यदेवतामन्त्रं कल्पनीयं। अग्निमीडे पुरोहित मित्यादि श्रुतेः। यत्र यत्राग्निकारणवाक्यानि वर्त्तन्ते तानि सर्व्वाण्यपि भूताग्निपराण्येवेति योजनीयं। तस्मात् कर्म्मण

---

१ ऐतरेयब्राह्मण प्रकाशित मुम्बयि मुद्रितैतरेय ब्राह्मण पुस्तके तु तदन्तरेण सर्व्वा अन्याः देवता इति।

२ स्वरूपेण। वा. पु.।

एवमग्निर्देवता मन्त्रोऽयमुक्तः । तदुपासनया ऐहिकलोक-वाचादिफललाभेऽपि मुक्त्यभावात् । तस्मात्कर्मोक्तत्वेनाभ्युपा-गमनं कृत्वा 'जीवनं द्रव्यं धान्यञ्च श्रियमिच्छेद्भुताशनादिति-वचनबोधितं फलं प्राप्य मुक्तये सर्वव्यापकचैतन्यस्योपासना (१) शुद्धाद्वैतमूर्तिमाश्रित्य मुक्ता भविष्यथ तद्विरुद्धधारणं च परिहर्तव्यं प्रमाणाभावादित्येवमाचार्यैरुक्ताः सुरेशादयः श्री-शङ्कराचार्यं गुरुं प्रणम्य तत्कटाक्षलोकिताद्वैतमूर्तिनः तथोक्तं चक्रुः ।

इत्यनन्तानन्दगिरिकृतौ अग्निवादिमतनिबर्हणं नाम द्वादशं प्रकरणम् ॥ * ॥

---

[१] उपासनाय । मा. पु. । का. पु. । स. पु. । तै. पु. ।

त्रयोदशं प्रकरणं।

तत: परिपूर्णमण्डलतिलकाः रक्तकुसुमधारिणः सूर्य्य-भक्ताः दिवाकरादयः श्रीशङ्कराचार्य्यमद्वैतमतसिद्धान्तगुरुं नमस्कृत्येदमूचुः। भोः स्वामिन् सूर्य्य एव परमात्मा जगत्कारणं वर्त्तते। स एवास्माकं कुलदैवतमुपास्योऽस्ति तस्य जगत्कारणत्वं श्रुतय एवाहुः। तथा हि "सूर्य्य आत्मा जगतस्तस्थुषश्च।" "असावादित्यो ब्रह्मेति च।" आभ्यां हि सूर्य्यस्य सर्व्वात्मत्वं ब्रह्मत्वं च परमात्मत्वं च प्रतिपादितं भवति। ब्रह्मैव च सर्व्व-जगत्कारणं यतो वा इमानि भूतानि जायन्त इत्यादिश्रुतेः। स्मृतिश्च।

नमः सवित्रे जगदेकचक्षुषे
जगत्प्रसूतिस्थितिनाशहेतवे।
त्रयीमयाय त्रिगुणात्मधारिणे
विरिञ्चिनारायणशङ्करात्मने ॥ इति।

तस्मादेतस्य घृणिः सूर्य्य आदित्यमित्यष्टाक्षरमन्त्रोपासकाः

रक्तचन्दनपुष्पमालाधारिणः षड्विधा भक्ता वर्त्तन्ते (१)।
केचिदुदयमण्डलं ब्रह्मात्मकत्वेन सृष्टिकारणमिति भजन्ति।
केचित्तु मध्यवर्त्तिनं सूर्यं ईश्वररूपेण सर्व्वजगल्लयकारण-
मिति भजन्ति उपसंहारबलादुपक्रमोऽपि तेनैव भवतीति
निश्चयज्ञानेन भजन्ति। केचित्तु अस्तमयकालबिम्बं विष्णवात्म-
कत्वेन (२) सर्व्वजगत्परिपालनकारणं तदेव सृष्टिलयहेतुभूतं
परतत्त्वमिति भजन्ति। केचित्त्रिमूर्त्यात्मकत्वेन त्रिकालमण्डलसे-
विनः केचिन्मण्डलेक्षणव्रतानुष्ठायिनः तन्मध्यवर्त्तिनं परमात्मान

---

१ ततःपरं पूर्णमण्डलतिलकाः रक्तकुसुमधारिणः सूर्यभक्ताः दिवाकरादयः श्रीशङ्कराचार्य्यमिदमूचुः। स्वामिन्नस्मन्मतमनन्यभेद्यं यतः सूर्य्यः सर्व्वलोकचक्षुः किल। अत एव ब्रह्मादिस्वरूपः तस्मात् सृष्टिस्थितिलयहेतुभूतः स एव परमात्मा भवितुमर्हति सूर्य्य आत्मा जगतस्तस्थुषश्चेतिश्रुतेः। किञ्च परब्रह्मत्वं तस्यैव घटते। असावादित्यो ब्रह्मेति श्रुतेः। अस्यैव भगवतः परमश्चोऽष्टाक्षरः घृणिः सूर्य्य आदित्यो न प्रभावात् अक्षरं मधुक्षरं मधति तद्रसं सत्यस्यैतद्रसमापो ज्योतिरसोऽमृतं ब्रह्म भूर्भुवस्स्वरोमिति अनन्तवेषिं भगवतोऽष्टाक्षरमन्त्रः तमेव व्याकरोति श्रुतिः घृणिरिति द्वे अक्षरे ॐ। सूर्य इति त्रीणि आदित्य इति त्रीणि एतद्वै सावित्रस्याष्टाक्षरं पदं श्रियाभिषिक्तं श्रिया अभिषिच्यते इति एतन्मन्त्रोपासकाः सूर्य्यमतानुवर्त्तिनः रक्तचन्दनपुष्पमालाधारिणः बहुविधा भक्ता वर्त्तन्ते। पा पु।

२ विष्णवात्मकत्वेन। पा पु।

हिरण्मयश्मश्रुः हिरण्यकेश इत्यादि लक्षणं श्रूयते । (१) वैदिक-
देशिकाः अधमत्रैवर्णिकमात्रपराः यजमानफलं इष्ट्वा पौरु-
षेयपुरुषपूजां कुर्वते कर्मफलं भगवदर्पणं कृत्वा वर्तन्ते न दर्शनं
विनाऽऽपृच्छन्ति । पुनः केचित्प्रवीणेन फलमुत्सृज्य सत्सेवेषु मण्ड-
लवर्तिनं तथा वामनरूपं (२) देवमनुजरूपं ध्यायन्तः सन्ति ।
तेषां प्रवरवर्तिन एव मन्त्र उपासनीयः श्रुतिः सूर्यं आदित्य-
मिति तथाप्युक्तास्तोपम्यान्तरः तस्मादेतन्मन्त्रस्य श्रेष्ठस्यैव-
मेव सर्वैरुपासनीयः तन्मण्डलस्तुतिपरा श्रुतयः भूयस्यः सन्ति
तथाहि । " हंसः शुचिषद्वसुरन्तरिक्षसदिति । " " आदित्यो
वा एष एतन्मण्डलं तपती " त्युपक्रम्य " य एवं वेदे " त्युपनि-
षदन्तेन ग्रन्थेन " य एषोऽन्तरादित्ये पुरुष " इति सूर्यस्यैव
मन्त्रत्वं पुरुषत्वञ्च घटते । सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्र
पादित्यादि पुरुषसूक्तप्रतिपाद्यः सूर्य एव कथं मण्डलादुपरि-
तमोनिवृत्तये प्रसृताः रश्मयः शीर्षाणि तान्यस्य सन्तीति
सहस्रशीर्षा स एवात्मत्वेन पुरीषु अन्तः शेते इति पुरुषः अस्य
सः पुरुषः ।

> पुरसंज्ञे शरीरेऽस्मिन् शयानात् पुरुषो हरिः ।
> शकारस्य षकारोऽयं व्यत्ययेन प्रयुज्यते ॥ इत्युक्तेः ॥

---

२ हिरण्यश्मश्रुः हिरण्यकेशः आप्रणखात् सर्वं एव सुव-
र्णस्य यथा कप्यासं पुण्डरीकमेवमक्षिणीमित्यादिस्वरूपं भज-
त्यौपाधिकः । तै पु ।

३ रविं मनस्येव । वा पु ।

तस्य सर्व्वप्राणिकर्म्मसाक्षित्वात् सहस्राक्षः। अथवा सहस्रा रश्मयः सहस्रपादाः तस्य ते सन्तीति सहस्रपात्। स एव भूमिं विश्वतः समन्तात् स्पृत्वा व्याप्य सप्तमाननेन भूम्युपरि सूर्य्यपर्य्यन्ताकाशस्य दशाङ्गुलपरिमाणत्वात् दशाङ्गुलमिति अतिक्रम्य अतिष्ठत स्थित इत्यर्थः। इदं परिदृश्यमानं जगत् सर्व्वं पुरुष एव(१) सूर्य्य एवेत्यर्थः। यद्भूतं पूर्व्वकल्पे यद्भूतं तदपि यच्च भव्यं वर्त्तमानकल्पापेक्षया भाविकल्पे यज्जगद्वर्त्तते तद्भानुरित्युच्यते (२) तदपि स एव। उतामृतत्वस्य मोक्षस्य तत्कारणस्य च ईशानः कर्त्तेत्यर्थः। इत्यादिमन्त्रैः (३) सूर्य्यस्यैव सर्व्वोत्तमत्वमङ्गीकर्त्तव्यं। अतः पुरुषो ज्यायानिति अत्र बहुवारपठितपुरुषशब्देन एष पुरुष इति शब्दसाम्यात् सर्व्ववेदप्रतिपादितः सूर्य्य एव (४) पुरुषं कृष्णपिङ्गलमित्यादिरुद्रप्रतिपादकमन्त्रस्थ-(५) पुरुषशब्दोऽपि भगवत्पर एव भगवत्पुरुषशब्दावुभावपि सूर्य्यपरावेव कथं हन्ति सर्व्वदा गच्छतीति हंसः शुचिषु शुद्धेषु प्रदेशेषु सीदतीति शुचिषत् वसुः वसुदेवः स एव वासुदेवः तस्मिन् भगवत्पुरुषशब्दावनुपाधिकौ वर्त्तेते।

---

१ पुरुष एष इति। का. पु.। स. पु.। तै. पु.। पुरुष एव एवेति क्वचित्।

२ तद्भव्यमित्युच्यते। का. पु.। तै. पु.।

३ इत्यादिमन्त्रे। का. पु.। स. पु.। तै. पु.।

४ सूर्य्य एकएव इति। तै. पु.।

५ मन्त्रस्येति। स. पु.। का. पु.। तै. पु.।

भगवानितिशब्दोऽयं तथा पुरुष इत्यपि ।

निरुपाधी प्रवर्त्तेते वासुदेवे सनातने ॥ इति ॥ (१)

भारतवचनात् । ननु नैतौ सूर्य्यप्रतिपादकौ भगवत्पुरुषशब्दौ किन्तु नारायणप्रतिपादकौ । तथा हि । वसुदेवस्यापत्यं वासुदेवः कृष्ण इत्यर्थः । तस्मिन् पूर्णब्रह्मरूपे कृष्णे भगवत्पुरुषशब्दौ निरुपाधिकौ वर्त्तेते । प्रकरणबलादित्थःचिन्मे ।

पूर्व्वपक्षावलम्बी पुनराह भगवत्पुरुषशब्दौ सूर्य्यपरावेव (२) तस्यैव विष्णुत्वात् कथं भगवतः सूर्य्यस्य द्वादशभेदात्मकत्वेन विष्णुनामस्तदन्तःपातित्वेन च तद्विरोधो नास्त्येव । अरुणः सूर्य्यो भानुस्तपनश्चन्द्रो रविर्गभस्तिश्चार्य्यमा हिरण्यरेता दिवाकरो मित्रो विष्णुश्चेति वचनात् । 'आदित्यानामहं विष्णुः ज्योतिषां रविरंशुमानिति ' कृष्णवचनगीतादर्शनात् । कृष्ण एव सूर्य्यः वासुदेवशब्दसाम्याच्च ध्येयः सदा सवितृमण्डलमध्यवर्त्ती नारायण इति वचनात्तयोर्भेदाभावः । इतीरि, स एव हरिः स्वासमयकाले सर्व्वप्राणिप्राणहरत्वं (३) द्रष्टत्वं अरुणोदये भगवतः प्रसिद्धमेव लोके तथाव्यवस्थादर्शनात् रुद्रोऽपि स एव स्वशक्त्या लोकद्रावणस्य (४) विद्यमानत्वात् अत एव

---

१ वासनाद्वा सनातन इति । वा. पु. । का. पु. । स. पु. ।

२ वर्त्तेते इत्यधिकः । का. पु. । स. पु. ।

३ सर्व्वप्राणिहरत्वं । वा. पु. ।

४ लोकद्रावकस्येति । वा. पु. । का. पु. । स. पु. ।

नमस्ते रुद्रमन्यव इत्यादिमन्त्रप्रतिपादितः सूर्य्य एक एव। तस्य स्वयंप्रकाशस्य सर्व्वदेवात्मकत्वात्। किञ्च ब्रह्मविष्णुरुद्राः सृष्ट्यादिकारणात् सूर्य्यादेव जाताः सर्व्वलोकोद्धरणहेतुभूतस्य सूर्य्यतेजसः प्रकृष्टवर्णत्वेन तद्वर्णादुत्पत्तिः तेषां युक्तैव चक्षुक्तं मद्गहोत्युपनिष (१) त्प्रमाणात्। अतः सूर्य्य एव सर्व्वैर्मुमुक्षुभिरुपास्यः। तस्य लिङ्गपूर्णमण्डलधारणादिभिरलङ्कृतगात्रास्तन्मन्त्रजपध्यानासक्ताः यूयं मुक्ता भविष्यथेति पूर्व्वपक्षे प्राप्ते।

श्रीशङ्कराचार्य्यैरिदमुच्यते भो दिवाकरमूढ किमुक्तं भवता तदसमञ्जसं वेदविरोधात्। तथा हि "चन्द्रमा मनसो जातश्चक्षोः सूर्य्योऽजायतेति" श्रुतेः। सूर्य्यस्यापि जन्यत्वदर्शनात् यज्जन्यं तदनित्यमिति तर्कसिद्धान्तस्य विद्यमानत्वात् घटादिवदनित्यस्य सूर्य्यस्य कथं परब्रह्मत्वं (२) सिध्येत किन्तु तादृक्श्रुतितात्पर्य्यन्तु सूर्य्यनिष्ठपरमात्मपरमित्युक्तेयं जगदीश्वराज्ञावशादेव सूर्य्यो भ्रमतीति तैत्तिरीयके समाम्नातं।

भीषास्माद्वातः पवते भीषोदेति सूर्य्यः।
भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः॥ इति॥

तस्मात् सूर्य्यस्य पारतन्त्रिकत्वं (३) प्राप्तं। किञ्च सूर्य्यादिषु प्रभा (४) जगदीश्वरस्यैव। तथोक्तं श्रुत्यन्तरे

---

१ उपनिषदः इति। वा. पु.।

२ कथं ब्रह्मत्वं। वा. पु.।

३ पारतन्त्र्यं। वा. पु.।

४ सर्य्यादिनिष्ठप्रभेति। तै. पु.। सर्य्यादिनिज प्रभेति। का. पु.। स. पु.।

न तत्र सूर्य्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्व्वं
तस्य भासा सर्व्वमिदं विभाति ॥ इति ॥

अत एवादित्यान्तःपुरुषस्य (१) हिरण्यश्मश्रु हिरण्यकेश-मित्यादिप्रतिपादितस्यैव परमात्मनः सर्व्वोत्कृष्टस्य स्तुतिपराः श्रुतयः कथमादित्यं नित्यं वर्णयन्ति । ज्योतिःशास्त्रे तद्-नित्यता वर्णिता ।

सृष्टिः सरोजासनवासरादौ
वियच्चराणां विलयस्तदन्ते ।
आद्यन्तकालः स च कल्प उक्तः
कल्पद्वयं स्याद्दिवसो विरिञ्चेः ॥ इति ॥

वियत्याकाशे चरन्तीति वियच्चराः ग्रहाः सूर्य्यादयः तेषां सरोजासनस्य ब्रह्मणो वासरादौ दिनादौ सृष्टिरुत्पत्तिः तदन्ते दिनान्ते विलयः एवमाद्यन्तकल्पः सहस्रयुगप्रमाणः विरिञ्च-श्चतुर्मुखस्य (२) दिनं दिवाकालः रात्रिरपि तादृशी कल्प-द्वयमितो ब्रह्मदिवस इत्यर्थः एवं ब्रह्म दिनकर्त्तुः सूर्य्यात् (३) ब्रह्माद्युत्पत्तिर्भवदुक्ता तस्मादेव विदितो भवदधिकारः । ब्रह्मायुःशताब्दमध्ये एकस्मिन् दिने जन्मादिवृत्तिं (४) शास्त्रस्य

१ अत एवान्तः पुरुषस्य । वा. पु. ।

२ विरिञ्चिश्चतुर्मुखस्यैति । वा. पु. । का. पु. । स. पु. ।

३ एवं ब्रह्मणः सूर्य्यजनकत्वं सूर्य्यात् । वा. पु. ।

४ जन्मनिवृत्तिं । ते. पु. ।

सूर्य्यस्य ब्रह्मपुरुषशब्दवाच्यत्वं भवता सम्पादितं किमु वक्तव्यं भवद्विद्याविषद्यं । सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादित्यादिना भगवतो विश्वरूपत्वं प्रदर्शितं नित्यस्य परमात्मनो लोकबहिरन्तर्गतस्य यद् यद्विशेषणमुक्तं तत्तत् सूर्य्यस्येति भ्रान्तो वक्षि सूर्य्यगतः परमात्मा सूर्य्यमण्डलबहिरन्तःस्थित एव तद्द्वारा तमोनिर्हरणं स एव करोति । जगदीश्वरादन्यस्य तादृग्विधशक्त्यभावात् सूर्य्यादन्यः (१) देवमनुष्यतिर्य्यग्जन्तुष्वपि परमात्मा नैवान्तर्गतः सन् वर्त्तत एव दीप्तेः तद्रूपत्वात् य एषोऽक्षिणि पुरुषो दृश्यते यश्चासावादित्ये स एक इति श्रुतेश्च एकोऽप्यात्मा सर्व्वजगदन्तर्गतः । प्रतिपादितञ्चैतत् श्रीं अन्तस्तद्धर्म्मोपदेशादिति व्याससूत्रेऽस्माभिः । तस्मात्तच्चिह्नधारणं (२) पाषण्डोद्बोधकं त्यक्त्वा स्मार्त्ताचारपरिलब्धशुद्धाद्वैतविद्यावलाम्बुका भवथ । एवमाज्ञप्ता दिवाकरादयः सौराः परमगुरुं नत्वा तत्कटाक्षलब्धशुद्धाद्वैतवादिनः शिष्या बभूवुः ।

इत्यनन्तानन्दगिरिकृतौ सौरमतनिवर्हणं नाम त्रयोदशं प्रकरणं ॥ * ॥

---

१ सूर्य्यादन्यदेव । बा. पु. । सर्य्यादन्यदेव का. पु. ।
स. पु. । तै. पु. ।

२ सर्व्वजगदहिरन्तर्गतः श्रीं अन्तस्तद्धर्म्मोपदेशादिति सूत्राथ सदधिकरणे श्रीमच्छङ्कराचार्य्यैरुक्तं ब्रह्मपरमेव चैतद् [illegible]करणमिति तस्मात् सर्व्वगते ब्रह्मण्यान्तरीय भानुमतचिह्नमर्यं त्यज तच्चिह्नधारणं । बा. पु. ।

शङ्कर विजये

चतुर्दशं प्रकरणं ।

ततस्तत्र गतैर्विप्रैः सर्व्वैरपि यतीश्वरः ।
समाश्रितो यथा तस्माद्वायोराशां जयेच्छया ॥ (१)
शिष्येषु निसहस्रेषु केचिच्छ्र्ङ्गप्रपूरणैः ।
केचिद्वाद्यविशेषैश्च केचित्तालैः शुभोक्तिभिः ॥ (२)
केचिद्घण्टानिनादैश्च कर्दोपैश्च केचन ।
केचिद्व्यजनवातैश्च पिच्छवातैस्तथापरे ॥
समर्चयन्ति संन्यस्तसुखदुःखं यतीश्वरं । (३)
...गगता विप्रा दृष्ट्वा तच्छिष्यतां गताः ॥
एवं प्रतिदिनं गत्वा तत्र तत्र गतान् द्विजान् ।
कुमतस्थान् परानन्दभाजः कृत्वा शुभोक्तिभिः ॥
पुरङ्गत्वरं प्राप गणपस्याश्रमं शुभम् ।
तत्र नद्यां हि कौमुद्यां स्नात्वा विप्रैश्रमव्ययम् ॥

---

१ समानीतो यथा तस्मात् वायोराशां जलेश्वरादिति । वा. पु. ।

२ सुखोक्तिभिः । ते. पु. ।

३ सन्न्यस्तसुखदुःख यतीश्वरमिति क्वचित ।

संपूज्य यतिराड् तत्र मासमात्र सहानुगैः।
पद्मपादमुखाः शिष्याः पञ्चपूजापरायणाः॥
दिग्गजा इति विख्याताः परविद्याप्रभेदिनः।
परपक्षहरोद्युक्तवचसः प्रौढवादिनः॥
तद्वाक्यं शिरसा धृत्वा शिष्योऽन्यः पृथ्वीधरः। (१)
नियन्ता सर्व्वशिष्याणां पाकादिषु च कर्म्मसु॥
समर्च्य च गुरुं भिक्षां दत्त्वा तस्मै परात्मने।
पद्मपादस्तदन्येषां शिष्याणां षड्रसैर्युतं॥
अददद्भोजनं नित्यं ब्रह्मार्पणमिति स्मरन्।

सायन्तने सर्व्वशिष्याः परमगुरुमाचार्य्यशिरोमणिं द्वादशवारं प्रदक्षिणनमस्कारान् कृत्वा बहुधा स्तुत्वा कृताञ्जलिकराः परमेवं स्तुवन्तो नृत्यन्ति परिपूर्णोऽहं ब्रह्म सत्यं सत्सुखरूप चिदानन्दोऽहं शुक्तौ रजतवदाभातीदं मयि (२) विश्वं निखिलं मिथ्येति स्थूलकारणलिङ्गदेहैः आकाशादिवदस्पृष्टोऽहं (३) तादृङ्मयि बन्धः को वा दारादिर्नाम भविष्यति तत् अम्भःकणजालैरस्पृष्टं तामरसदलमिव न स्म भवं मत्तो जाता प्रकृतिरनन्ता तद्गर्भान्महदुद्भूतं हि तस्माज्जातोऽहङ्कारारव्यस्त्रिगुणयुतोऽभवत्तस्माज्जाताः रुद्रो विष्णुर्ब्रह्मा तेभ्यः सृष्टिस्थितिलयप्रभव-

१ पुरजिद्दलिदिति। का. पु.। स. पु.। पुरजिद्दलमिति। वा. पु.। पुरजद्दलमिति क्वचित्।

२ मयीत्यस्याभावः। वा. पु.।

३ देहैः कारणमयेऽप्यस्पृष्टोऽहं। वा. पु.।

स्तिनरां कार्य्यार्थिभिरेतैः कृतमपि तद्धृदयगतोऽहं साक्षी परमः सर्व्वत्राऽहं वहिरन्तःस्थः सम्यक्ज्ञानफलप्रद एव सत्यं ज्ञानमनन्तं ब्रह्म सर्व्वथा सर्व्वमयोऽहं सर्व्वातीतः सर्व्वव्यापी कारणमेकः भानुमण्डलमध्यवर्त्तिपुरुषः साक्षी गतपरमदन्दोऽहं ईशो नित्यः शाश्वतविभवः सर्व्वमुक्तिदः सदुपासवतां सन्त्येवैते वेदा मन्त्रा मामद्वैतमजं न वदन्ति किं मनसाऽहं स्पृष्टः किम्वा करणै-र्दूरतरैरपि वेद्यः आत्मा ब्रह्म सदद्वयमेकः सच्चित्सुखरूपोऽहं सकलं मामिति ये मनुजा विदन्ति मायामेतां हि तरन्ति ते नित्यं मां निगमैर्मीमांस्यैर्वेदैः सत्यं मनसा धारयन्ति हि ये मुक्ति-स्तेषामनुतुलिता स्याद्भक्तिमतां किमसाध्यं लोके मम सच्चित्-प्रदमद्भुतरूपं ममर्षिगोत्वपि गुरुमद्वैतं यमनियमादिकृतः स्मरति हि येन् सममखिलात्मा समुपास्यः स्यात् नृत्यन्तो जल्पन्त-स्त्वेवं सत्यगुरुमभि नत्वा बहुधा शान्ता गुरुसन्निधिविश्रान्ताः दान्ताः पद्मपादाद्याः शिष्याः एवं प्रतिदिनभावं प्राप्ताः श्रीशङ्करगुरुपदगतचित्ताः । (१)

५ तादृक्प्रश्नः को वा शरीरादिर्नास्ति भविष्यति त्वमात्मैवैक-कश्चिदात्मा ऽविद्यया देहमभवं मनो आत्मोऽनन्तात्मनात्मानुभूतं जगन्मूलं तस्माज्जातोऽहङ्काराख्यः त्रिगुणयुतोऽभवत्तस्मात् कर्म विस्तार्य तेभ्यः सृष्टिस्थितिलयाः चभयन्निसरां कार्य्यार्थिभिरेतैः कृतमेतस्मात्प्रभावाणां साक्षी परमः सर्व्वत्राहम् हिरन्तस्थः सम्यक् ज्ञानफलप्रदं मामेवाज्ञः पुराबद्धाः सत्यं ज्ञानमनन्तं ब्रह्म सर्व्वाधा रः सर्व्वमयोऽहं सर्व्वातीतः सर्व्वव्यापः कारणमेकश्चिदानन्दः भानु

इत्यनन्तानन्दगिरिकृतौ गुरुस्तुतिर्नाम प्रकरणं चतुर्द्दशं ॥ * ॥

मण्डलमध्यवर्त्ती मुखमाश्रिजातः परमानन्दोऽहं ईशोऽनित्यः पुरुषः शाश्वतविभवः सर्व्वमुक्तिरत्र सन्त्येवैते वेदा मामद्वैतमत्रं न विन्दन्ति किं मनसाऽहं स्पृष्टः किम्वा करस्थैः दूरतरं येदाः आत्मा ब्रह्मपदद्वयमेकः सच्चित्सुखरूपोऽहं सकलं मामिति ये मनुजा विदन्ति मायामेतां तरन्ति ते नित्यं मां ये निगमावेद्यं ये सत्यं मनसा ध्यायन्ति तेषां मया तुष्टिता स्यात् मक्तिस्तेषां किमसाध्यं लोके मम सच्चिदमद्भुतरूपं सममखिलेष्वपि गुरुमद्वैतं यमनियमादियुतः स्मरति चेत् मामखिलात्मानं न सम्बन्धभाक् स्यात् नृत्यन्तो जल्पन्तः सत्यं गुरुमाश्रिता बहुधा भ्रान्ता गुरुसन्निहिताः शान्ताः दान्ताः पद्मपादाद्याः शिष्याः एवं कतिदिनभावं ग्रामाः श्रीशङ्करगुरुमठं चिताः सर्व्वे ॥ इत्यनन्तेत्यादि असमीचीनं पाठान्तरमेतत् । वा. पु. ।

पञ्चदशं प्रकरणं।

एवमानन्दसन्तुष्टमाचार्य्यं सेवकानपि ।
तत्पद्मनद्विजाः प्रेक्ष्य किमेतदिति चाब्रुवन् ॥ (१
न हि युष्मन्मतं सम्यगिव भाति हि पश्यताम् ।
आकाशवन्निरालम्बमद्वयं ब्रह्म केवलम् ॥
मनोवागादिवृत्तीनामगोचरतरं परम् ।
कथमज्ञोपबोधाय योग्यं स्यान्मतमीदृशं ॥
तत्त्यक्त्वास्मन्मतं सम्यगाचरन्तु शुभाशये ।
गाणपत्यमितिख्यातं बहुभिर्भेदैर्विजृम्भितं ॥ (२)
समस्तवेदतात्पर्य्यैस्सदैव हि समीरितम् ।
तदाचरध्वमत्यन्तशान्तिदं मोचदन्नृणाम् ॥
तुण्डैकदन्तचिह्नाभ्यां चिह्नितं भक्तिसंयुतम् ।
महागणपतिं यस्तु सदा ध्यायत्यनन्यधीः ॥

---

१ ततपद्मं न द्विजाः प्रेक्ष्य किमेतदितिचाब्रुवन्। स. चु. पु.। द्विजाः संप्रेक्ष्य बद्धधैर्यादि वा. पु.। ततपद्मनद्विजाः इत्यादि कचिच।

२ बहुभिर्भेदैर्विवर्जितं। वा. पु.। बहुभेदैश्च विराजितं। स. चु. पु.।

तन्मूलमन्त्रपठन-परः सन् ब्राह्मणोत्तमः ।
यो वर्त्तते स एवात्र मोक्षभाग्भवति ध्रुवं ॥ इति ॥

तद्ध्यानन्तु,

वीजापूरगदेक्षुकार्मुकसमचक्राब्जपाशोत्पल-
श्रीह्यग्रस्वविषाणकाञ्चनघटोद्भासत्कराम्भोरुहः ।
ध्येयो वल्लभया च पद्मकरया श्लिष्टोज्ज्वलद्भूषया
विश्वोत्पत्तिविपत्तिसंस्थितिकरो विघ्नो विशिष्टार्थदः ॥ इति

विश्वोत्पत्तिविपत्तिसंस्थितिकर इत्यनेन सृष्ट्यादि हेतुत्वं गणेशस्य घटते । ब्रह्मादित्रयेऽपि एकस्यैव गणपतेर्विद्यमानत्वात् । गणानां रुद्रविष्णुब्रह्मगणानां पतिः स एक एव प्रथम आसीत् । अहमेक एव गणपतिरासमिति श्रुतेः तस्माद्गणपतिरेव सर्व्वातीतः परमात्मा तन्मायारचिता ब्रह्मादय इति प्राप्ते आह्तः श्रीमदाचार्य्याः । (१)

भो गाणपत्य सत्यमुक्तं भवता गणपतेः सर्व्वोत्तमत्वं, तन्मायावत्वाद्रुद्राद्युत्पत्तिश्चेति भवद्भिः प्रतिपादितं किल तदसमञ्जसमिव प्रतिभाति (२) कथं सगुणस्य गजमुखस्य गणपतेः रुद्रगणैः सह लयानुगस्य जगत्कारणत्वं कल्पयितुमुचितं । किञ्च रुद्रसुत इति लोके प्रसिद्धिरस्ति तस्य ब्रह्मत्वे कल्पिते पिता-

१ श्रुतेः । अतो गणपतेः सर्व्वातीतस्य परमात्मन एव जगत्कारणत्वं सिद्धं तन्मायारचिता ब्रह्मादय इति अत एव तस्य गणपतित्वं एवं पठन्तं गाणपत्यमिदमाह श्रीमदाचार्य्यः । वा पु ।

२ प्रतिपादितं तदसमञ्जसं विप्रतिभाति । वा. पु. ।

दिकारणत्वं सुतस्यानुचितमेव अतो रुद्रादिकारणं परब्रह्मैव । सदेव सौम्येदमग्र आसीत् । ब्रह्म वा इदमग्र आसीदित्यादिवाक्या-दहमेक एव गणपतिनामेति वाक्यस्यार्थ उक्तोऽथः तस्य विश्वो-त्पत्तिस्थितिनिमित्तत्वं सिद्धं भवतीति निरास्यते महा-गणपतिमते पुनराह स्वामिन् सर्व्वज्ञ भवदनुकूलं भवद्भिरुक्तं अङ्गाभावः परतः निरावलम्ब एव भवति तस्यापि देवस्याभिमा-नाभावात् । अतः साङ्गेन पुंसा भवितव्यं । यस्माङ्गं धारयति पुरुषः तस्याभिमतं तस्मिन् वर्त्तते प्रायेणापि तद्गुणसालोको गृह्यते अतः सालोक्यस्य मुक्तिरूपत्वात्तत्प्राप्तिर्निरङ्कस्य कथं भविष्यति मम गिरिजापुत्रस्य मदीयानां (१) गणनाथ-गणपत्यादीनां चेति श्रुत्वा गिरिजापुत्राभिधं महागाण-पत्यवरं श्रीमदाचार्य्य इदमाह ।

शृणु जड़मते गिरिजापुत्र ब्राह्मणस्य किमङ्गं वक्तव्यं प्रथमं ब्राह्मणकुलजन्मैवाङ्गं द्वितीयं पुंसवनादिवेदोक्तकर्माङ्गं तृतीयं ब्रह्मचर्य्याद्याश्रमाङ्गं एवमङ्गत्रयविराजमानस्य सद्ब्राह्मणस्य निरङ्कता कथं ब्राह्मणाङ्गेन समस्याङ्गं न विद्यते । ब्राह्म-णकर्त्तव्येषु स्नानाचमनप्राणायामगायत्रीजपाग्निहोत्रवे-दाभ्यासेश्वरपूजादिषु वेदोक्तसत्कर्मसु किं न देवा विद्यन्ते सर्व्वदेवतास्पदस्य ब्राह्मणस्य देवाङ्गं कथं न विद्यते तादृग्वि-धाङ्गेन वर्त्तमाने पुनरङ्कधारणं पशोरिव चिह्नं भवति ।

किञ्च ब्राह्मणस्य किं वा लक्षणमित्युक्ते शिखायज्ञोपवीत-

---

१ मदीयानामिति । स. पु. । मदीयानामिति । बा. म. ।

धारणवेदोक्तकर्म्माचरणं श्रवणं तर्हि तत्त्वविषयेऽपि विद्यमानत्वात् तत्रातिव्याप्तिरित्युक्ते ब्रह्मकुलत्वं विशेषलक्षणं । एतत्प्रसङ्गेनैव ब्राह्मणस्य चारितार्थ्यात् शङ्खधारणं पापकृतताजनकं परिहर शङ्खाङ्काकारे महापातकमस्तीति पुराणश्रवणात् वेदविरुद्धत्वाच्च । किञ्च तदुपासकानां मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्ध्याज्ञाब्रह्मरन्ध्रेषु चतुर्द्दलषड्दलदशदलद्वादशदलषोड़शदलद्विदलसहस्रदलेषु मणिविद्रुमनीलपिङ्गलधूम्रतेजःकर्पूरवर्णेषु स्थिता गणपतिब्रह्मविष्णुरुद्रजीवात्मपरमात्मानः तदुपरि श्रीपरमगुरुरिति सततव्यदेवताः सप्तापि देहधारिणः अतो गणपतेर्मूलाधारगतस्य सर्व्वाधारकर्त्तृत्वं वर्त्तते । तदुपरि गतानां चक्राणां तदधिकारिणां ब्रह्मादिदेवतानां च तदाधारकत्वादतस्तथाविधे गणपतावीकस्थे तुण्डदन्तचिह्नं भुजयोः कर्त्तव्यमिति निरर्थकं ।

किञ्च मूलाधारस्थे गणपतौ सर्व्वोत्तमे परमात्मनि सम्यगाज्ञाचक्रगते अनयोरधिकारे भवन्मते विशेषत्वं चिन्तय दिक्सप्ततिसहस्रनाड़ीनां मूलाधाराश्रितानां नियामकत्वमात्रं गणपतेरधिकारः । तज्जनितनाड़ीभिरूर्द्धाधःप्रसृताभिर्देहस्थितिकारणभूताभिरतएव चक्राधारभूताभिर्गणपतेः कारणत्वं प्राप्तं परमात्मा सर्व्वगतोऽप्याज्ञाचक्रवासी भूत्वा साधकजीवरुद्रविष्णुब्रह्मगणपतीन् तत्तद्विनियोगेषु प्रेरयित्वा स्वयं साक्षी निर्गुणः सच्चिदानन्दमयः सर्व्वातीतः सर्व्वोत्कृष्ट इति सम्यग्वेदेषु प्रतिपादितः । अतः परमात्मानमाज्ञाचक्रगतं चिन्तय

मुक्तो भवसीत्युपदिष्टः गिरिजापुत्रः सगणः व्यक्तलिङ्गः परम गुरोः शिष्योऽभवत् ।

पञ्चपूजापरो नित्यं पञ्चयज्ञपरायणः ।
गुरुशुश्रूषणासक्तः समभूद्गिरिजासुतः ॥

इत्यनन्तानन्दगिरिकृतौ महागणपतिमतनिवर्हणं नाम पञ्चदशं प्रकरणं ॥ * ॥

शङ्कर विजये ।

षोड़शं प्रकरणं ।

एवं निरस्ते महागणपतिवादिनि गिरिजापुत्रे पुनरन्यो
रिद्रागणपतिमतवादी प्रत्यवतिष्ठते मन्त्रमर्थान्। स आह।
ाभिन्मदीयं मतं शृणु। हरिद्रागणपतिरेव सर्व्वजगत्कारणं।
च तत्त्वे प्रमाणाभावः श्रुतेरेव प्रमाणत्वात्। तथाहि।

गणानां त्वा गणपतिं हवामहे
कविं कवीनामुपमश्रवस्तमं।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पतिम्
आ नः शृण्वन्नूतिभिः सीद साद[illegible]॥ इति। (१)

ो यतिवर्य्य गाणपत्य[illegible]मयुक्तमिति प्रतिपाद्य चिरकालारभ्य
ढ़मतपद्विनं गिरिजापुत्रं तदाश्रितांश्च भ्रष्टान् कृत्वा वर्त्तसे
२) किमिदमुचितं तर्हि इदानीमागतं प्रतिपक्षविघ्नछ्छिराज-
ध्रुतिकुमारनामानं मां विद्धि।• किं गणेशमते न्यूनताऽसि
तुप्रतिपादकमन्त्रस्यायमर्थः। गणानां रुद्रविष्णुब्रह्मेन्द्रादि-
णानां गणपतिमध्यक्षं त्वां हवामहे ध्यानं कुर्म्महे। किं वि-
ष्टं कवीनां भृगुगुरुशेषप्रभृतीनां कविमुपदेष्टारमित्यर्थः।
ः कीदृशं उपमश्रवस्तमं उपमश्रवसां सकलश्रवणसर्व्व-
द्याविदां मध्ये तममत्यन्तं श्रेष्ठं। पुनः कीदृशं ब्रह्मणां प्रपञ्च

---

१ सादनमिति सर्व्वत्रपाठः।

२ वदसि। वा, पु.।

कर्तॄणां ज्येष्ठराजं तद्द्वारा ज्येष्ठप्रभुमित्यर्थः ब्रह्मादिभिरपि सृष्ट्यादिषु विघ्नेशः पूजनीय इत्यर्थः। आरम्भितकार्य्येषु सर्व्वेष्वपि देवमनुष्यादिभिः सर्व्वैर्विघ्नेशः पूजनीय इति पुराणेषु च बहुधा वर्त्तते तं ब्रह्मणस्पतिं ब्रह्मणामपि पतिमित्यर्थः। आ नः आ समन्तात् नः नुतिभिः स्तोत्रैः शृण्वन् सा निर्व्विघ्नं शुभं सीद ददात्वित्यर्थः। अतः सकलदेवपूज्यो गणपतिरेव। ध्यानन्तु।

पीताम्बरधरं देवं पीतयज्ञोपवीतिनं।
चतुर्भुजं त्रिनयनं हरिद्राभसदाननं॥
पाशाङ्कुशधरं देवं दण्डाभयकराम्बुजम्।
एवं यः पूजयेद्देवं स मुक्तो नात्र संशयः॥ इति॥

स्कन्दपुराणवचनात्। जगदादिकारणं गणपतिरेक एव तत्कटाक्षाज्जाताः तदंशभूताः सर्वे ब्रह्मादयः अतः मदिष्टपितामहं विघ्नेशं भवन्तोपि भजन्तु। तस्य विरूद्रयन्तु ... तदाकारतमलोदाङ्कितभुजद्वयस्तद्भक्तायगणस्तस्यैव मुक्तिः ... भवतीति पूर्व्वपक्षे प्राप्ते श्रीमच्छङ्कराचार्य्यैरिदमुच्यते।

किं गणकुमार भवद्बुद्धिवैकल्यमप्रतिहतं जगत्कारणवाक्यैः, सदेव सौम्येदमग्र आसीदित्यादिभिः प्रतिपादितं ब्रह्मैव गणपतिरिति तदंशा ब्रह्मादयः सृष्ट्यादिकर्त्तार इति भवादीनामपि सर्व्वविद्यागुरुर्गणपतिरिति च प्रसङ्गात किञ्चिदन्यच्च सम्यक् प्रतिपादितं भवता। शुद्धबुद्धमुक्तस्वरूपं सत्यं ज्ञानमनन्तं ब्रह्म गणपतिरेवास्य सर्व्ववाच्यस्य ब्रह्मणः

गणपतिशब्देन किमपराद्धं । अतः परमात्मनः सकाशात् ब्रह्मादयो जाता इत्यविरुद्धं । ब्रह्मादीनां तदंशसम्भूतत्वात् रुद्रपुत्रो गणपतिरिति तथाप्यविरोधः । अंशांशिनोरभेदात् अतो देवकार्य्यार्थो (१) जगन्निर्म्माणादिषु विघ्नहर्त्तृत्वार्थः । संसारिणामपि सर्व्वविघ्ननिवृत्तये तादृशगणपतिरुपास्य एव । अतः सर्वैर्मुमुक्षुभिरीशविष्णुगणपतिशक्तिसूर्य्याः पञ्च तत्तत्पुरुषबुद्धिभेदेनांशांशिभावमापन्ना उपास्या एव । किन्तु तुण्डैकदन्तचिह्नधारणमात्रमेव विरुद्धं लिङ्गिनः पाषण्डत्वश्रवणाद्वेदविरोधाच्च । तस्मात्तुण्डैकदन्तचिह्नं परित्यज्य शुद्धाद्वैतदृष्टिमाश्रित्य पञ्चपूजां स्नानादिनित्यकर्म्म च कुर्वन् मायानिवृत्तौ जातायां तद्द्वारा भग्नलिङ्गशरीरः सन् मुक्तो (२) भवसीत्येवमुपदिष्टो गणकुमारस्तथाङ्गीकृत्य गुरुवरं (३) ध्यायन् पञ्चपूजापरायणः सुखमाप ।

इत्यनन्तानन्दगिरिकृतौ गाणपत्यैकदेशिमतनिवर्हणं नाम षोडशं प्रकरणम् ॥ * ॥

---

१ देवतार्थी । वा. पु. ।

२ तद्द्वाराद्भग्नलिङ्गशरीराद्मुक्तः त्वं । वा. पु. ।

३ गणकुमारो धृतत्रिपुण्ड्रः सद्गुरुवरं । वा. पु. ।

सप्तदशं प्रकरणं।

———०*०———

एवं परिहृते गाणपत्यैकदेशिमते (१) पुनरन्यः उच्छिष्ट-गणपत्युपासकः दक्षिणेश्वरमार्गानुवर्त्ती हेरम्बसुत इति प्रसिद्धः प्रत्यवतिष्ठते। स तु श्रीमदाचार्य्यमिदमुवाच। भोः स्वामिन् हेरम्बसुतोऽहमागतोऽस्मि केन विधिना गणपतिमतमयुक्तमिति श्रीमद्भिर्भवद्भिरुक्तं। श्रूयतामस्मन्मतं शैवागमे द्वादशगणपतिप्रकरणे महागणपतिमतमेकं हरिद्रागणपतिमतमेकं उच्छिष्टगणपतिमतमेकं नवनीतगणपतिमतमेकं स्वर्ण-गणपतिमतमेकं सन्तानगणपतिमतमेकं एवं षड्विधगणपतिमतानि भवन्ति। एते मत प्रवर्त्तकाः षण्महामन्त्राः उपमन्त्रषट्कञ्च तत्तन्मतावान्तराणि षण्मतानि वामावलम्बकानि। उच्छिष्टगणपतेर्मतस्य ज्ञानमतं हैरम्बमित्युच्यते। उभयोरपि प्रधानाङ्गयोर्वाममार्गावलम्बकत्वेनोच्छिष्टगणपतिरिति नाम प्राप्तं। तदीयध्यानन्तु।

चतुर्भुजं त्रिनयनं पाशाङ्कुशगदाभयं।

१ गणपतिमतैकदेशिनि। वा. पु.।

तुण्डायपीतमधुकं (१) गणनायमहं भजे ॥ इति ॥

तदङ्गदेरम्बस्य तु ध्यानमेतत् ।

महापीठनिषण्णं वामाङ्कोपरि (२) संस्थितां ।

देवीमालिङ्ग्य चुम्बन्तं स्पृशन्तुण्डेन वै भजे ॥ इति ॥

अत एव तयोरङ्गाङ्गिनोर्वामवाङ्गन्वयात् ओविंशयोरिवे-कथानुसन्धानं युक्तमिति मतद्वयमध्यहनमवलम्ब्य कुङ्कुमाङ्कित-ललाटः पुण्ड्रान्तरपरित्यागी सन्ध्यादिसर्व्वकर्म्माणि इच्छावश-गानि कृत्वा सच्चित्तीर्थपानजनितानन्दविदितसकललोकः(३) एततसमयतान्तरं नास्तीति नित्यहृष्टोऽभवं ।

किञ्च मदीयाचारे धर्म्मद्वयमेवानुवर्त्तनीयं । पुरुषाणां सार्व्वजातिकानां एकजातिवद्दित्येको धर्म्मः, स्त्रीणां सार्व्ववर्णि-कानां एकजातिवद्दित्येको धर्म्मः, तेषां तासाञ्च संयोगे वियोगे च दोषाभावः । अस्या अयमेव पतिरिति नियामकाभावात् । तासु रजःसिक्तादौ सुसम्पर्के (४) जाते रुधिरबाहुल्यात् आन-न्दाधिक्याच (सर्व्वे वर्णाः समानजातयः दाम्पत्यव्यवस्था नास्ति । येन केनापि पुरुषेण स्वस्वेरम्बतां विभाव्य यां का-ञ्चित्स्त्रियमात्मशक्तिं विचिन्त्य सुरयेन सम्भोगः कार्य्यः इत्यधिकः

१　तुण्डायनीलमधुकं । वा. पु. ।

२　वामाङ्कोपरि । वा. पु. ।

३　सच्चिमदहनजनितानन्दविदित सकलालोकः । वा. पु. ।
　　　　का. पु. । स. पु. ।

४　रजःसिक्तासु सम्पर्के । वा. पु. ।

क्वचित् ।) आनन्दप्राप्तिरेव ब्रह्मप्राप्तिरिति तस्य सच्चिदानन्द-
लक्षणाच्च । तस्मादुच्छिष्टगणपतेरखण्डानन्दरूपत्वेन ब्रह्मरूप-
त्वेन च तन्मतमनन्यभेद्यं । तदंशाः सर्व्वे ब्रह्मादयो देवाः. [illegible]-
ग्निनोरभेदः प्रतिपादितो रुद्रकाण्डे । नमकेपि, नमो गणेभ्यो
गणपतिभ्यश्च वो नमो नम इति । गणरूपेभ्यो गणपतिरूपे-
भ्यश्च रुद्रेभ्यो नम इत्यनेन (१) गणत्वं गणपतित्वञ्च एकस्मिन्
रुद्रे वर्त्तते ओँकारातीतस्य परमशिवस्य गणपतिरूपत्वेन
तदंशाः सर्व्वे देवा इतियुक्तं । अतो [illegible]प्राप्त्यै कर्म्मणो कार-
णत्वात् संहन्तिर्व्यर्थैव ।

किञ्च न कर्म्म मुक्तिसाधनं किन्तु कर्म्मत्याग एव । न कर्म्मणा
न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुरिति श्रुतेः । त्यागः
सन्न्यासः स तु द्वन्द्वातीतः शान्तो दान्तः उपरतस्तितिक्षुः स -
हितः श्रद्धायुक्तो भूत्वाऽऽत्मन्येवात्मानमनुपश्येदिति श्रुतेः । उ
तिः सन्न्यासः । तितिक्षा शीतोष्णद्वन्द्वसहनं एतदुपलक्षणं सुख-
दुःखमानापमानपुण्यपापादिष्वपि (२) द्वन्द्वता योजनीया ।
द्वन्द्वातीतवृत्तेः मोक्षहेतुत्वे तत्सहकृत्यवलम्बनस्य उच्छिष्टगणपति-
मतानुकूलत्वात्तन्मतं मुमुक्षुभिः सर्व्वैरुपासनीयमिति प्राप्ते
श्रीमदाचार्य्यैरुच्यते ।

भो हेरम्बसुत भवन्मतमनुचितं । वेदविरोधसद्भा-
वात् । वेदो हि ब्राह्मणादीनामुचितधर्मानुज्ञा यस्मात्तदाप-

---

१ इत्यन्तेन । वा. पु. ।

२ सखसखिसमानासमान पुण्यपापादिष्वपि । वा. पु. ।

ह्यपि इदमशास्त्रमिति निषेधमाह। न सुरां पिबेत् न कलञ्जं भक्षयेत् न परादारां गच्छेत् मार्गीनुद्वासयेदित्यादीनि बहूनि वचनानि सन्ति। तस्मादेतद्ब्राह्मणस्य सुतरामयुक्तमेवाङ्गीकरणं मुमुक्षुभिरङ्गीकर्त्तव्यमिति भवदुक्तं तदपि न्यास एवेति अपरे च यदित्यादिना (१) न्यायेनैके अमृतत्वमानशुरित्यादिना श्रुत्यर्थेन संन्यासिन एव मोक्षाधिकारित्वमुक्तं भवतीति तस्य द्वन्द्वातीतत्वादिगुणविशिष्टत्वात् सुखदुःखमोहादिपरित्यक्तस्य महायतेः परमहंसस्य दृक् यत्र यत्र पतति तत्र ब्रह्मस्वरूपनिश्चयात् सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्च नेति ब्रह्मव्यतिरेकेण प्रपञ्चासत्त्वमात्ररूपिणः शुद्धाद्वैतं ब्रह्माहमस्मीति महामार्गारूढस्य सर्वभूतान्तःकरणसाक्षिणः शुद्धचैतन्यस्य द्वन्द्वातीतत्वं युक्तमेव। तदुपमानं कृत्वा भवत्प्रमुखाः संसारिणः सुरां पिबामः कलञ्जं भक्षयामः प्रतारणबुद्धिरित्याजल्पथ तदत्यन्तदौष्टं नरकप्रदमेव मतं तस्माच्च मूढबुद्धिं परित्यज्य ब्रह्मसभानुग्रहात् कलितप्रायश्चित्ताः यूयं मुक्तिमार्गमवलम्ब्य पञ्चपूजापराः पञ्चयज्ञादिनित्यकर्मनिरताश्च कथं मूलाधारादिब्रह्मरन्ध्रान्तं प्रतिचक्रं गणपतिब्रह्मविष्णुरुद्रान् जीवपरमात्मगुरुसर्वदेवताः परिकल्प्य पञ्चपूजापुरःसरमजपामन्त्रजपपरास्तद्देवताध्यानमात्रेणैव मुक्ता भवथ नान्यद्विचारणीयं भवद्भिरित्युपदिष्टा हेरम्बसुतादयः तत्सभानुग्रहात् कृतप्रायश्चित्ताः

१ न्यास एव यदित्यादिना। वा. पु.।

श्रीमत्परमगुरुं नत्वा तत्कटाक्षप्राप्तब्राह्मण्यधर्माः श्रुत्याचार
परित्यक्ता अद्वैतविद्याभ्यासतत्परा बभूवुः ।

इत्यनन्तानन्दगिरिकृतौ उच्छिष्टगणपतिमतनिवर्हणं नाम सप्तदशं प्रकरणं ॥ * ॥

शङ्कर विजये

अष्टादशं प्रकरणं।

अतः परं नवनीतस्वर्णसन्तानगणपत्युपासकाः समागत्य श्रीमदाचार्य्यस्वामिनमिदमूचुः। स्वामिन् वयं नवनीतादिगणपत्युपासकाः मदीयाचारस्तु वेदोक्तकर्मानुकूलेन (१) तत्तदुपासनां कुर्मः। किन्तु गणपतेस्सत्त्वं सर्व्वेषां देवानां तदंशजातत्वं च निश्चित्य गणपतिमतसिद्धान्तमोक्षाभिलाषिणः सर्व्वं जगत् गणपतिरिति ध्यायिनो भवामः। न किल तत्र विवादः कर्त्तव्यः तस्य सर्व्वकार्य्येषु सर्व्वदेवपूज्यत्वात् आदौ पूज्यो गणाधिप इत्यादिप्रमाणसद्भावाच्च कथं भवद्भिर्महागणपत्यादिमतत्रयं निराकृतं तद्व्यतिरेकेण परमार्थिकाभावादिति। तत्तदुपासकैश्च तत्प्रीत्यर्थं हरिद्रादिधारणं कर्त्तव्यमेवेति प्राप्ते श्रीशङ्कराचार्य्यस्वामिभिरिदमुच्यते।

मतमिति यत्सदेवासत्। यूयं मूढाः पारमार्थिकावेदिनः सत्यं ज्ञानं शृण्वन्तु। प्रकृतिपुरुषाभ्यामादौ महत्तत्त्वे जाते तद्गर्भे अहङ्कारतत्त्वं गुणत्रयात्मकं उत्पन्नं तदेव रुद्रविष्णुब्रह्मरूपमभवत् ते क्रमात्स्वर्मीकृतस्वतद्गुणैर्विशिष्टजगदुत्पत्ति-

---

१ वेदोक्तकर्मानुकूलत्वेन। का. पु.। स. पु.। तै. पु.।

चेतवोऽभवन् । तत्र किल नामसारङ्कारे रुद्रस्कन्धात्मजाताः गणपतिकुमारभैरवाः ते जगति स्वस्वाधिकारिणः (१) गणपतेः सृष्ट्यादि प्रयोजनेषु (२) मनुष्यसाध्येषु सृष्ट्यादिप्रयोजनेषु ब्रह्मादिसाध्येषु च तत्सदादिपूज्यत्वं वर्त्तते तत्र सर्व्वकार्य्यनिर्व्विघ्नतासिद्धये कार्य्यादौ गणपतिः पूजनीयत्वेन स्थापितः लोके सार्वभौमेव तत्तत्कार्य्ये तत्तदधिकारिकल्पनावत् । अस्तु वा गणपतिरेव परमात्मा । अंशांशिनोरभेदात् (३) । तस्मात् (४) विप्रैर्गणपतिब्रह्मविष्णुरुद्रजीवपरमात्मानः (५) देहान्तर्गत मूलाधारादिचक्रेष्वेवोपास्याः तादृगनुष्ठानाशक्तानां (६) ब्राह्मणानां गणेशेनोमाहरीशाः प्रतिमादिषु पञ्च पूज्याः सर्व्वथा प्रमाणरहितं हरिद्रादिचिह्नमसङ्गतमित्युपदिष्टाः वीरभद्रैकदन्तादयः नवनीतमार्गमतानगणपत्युपासकाः परमगुरुं नत्वा परित्यज्य हरिद्रादिचिह्नानि पञ्चपूजापराः शङ्कराद्वैतविद्यासादिनः शिष्या (७) बभूवुः । (८)

---

१ स्वस्वाधिकारिणः । का. पु. । य. पु. ।

२ सृष्ट्यादि प्रयोजनेषु । सै. पु. ।

३ तत्र सर्व्वकार्य्यनिर्व्विघ्नतेत्याद्यंशांशिनोरभेदादित्यन्तपाठासद्भावस्तैलङ्गपुस्तके ।

४ परन्तु । स. पु. ।

५ गणपत्यादयो । स. पु. । का. पु. ।

६ तदशक्तौ । स. पु. ।

७ तच्छिष्याः । सै. पु. ।

८ रुद्रस्कन्धान्तर्जातो गणपतिः कुमारो भैरवश्च ते जगति

इत्यनन्तानन्दगिरिकृतौ गणपतिमतवर्णनं नाम अष्टादशं प्रकरणं ॥ * ॥

स्वस्वाधिकारिभिः गणपतेः सृष्ट्यादिप्रयोजनेषु मनुष्यसाध्येषु सृष्ट्यादिप्रयोजनेषु ब्रह्मादिसाध्येषु च तत्तदादिपूज्यत्वं वर्तते ब्रह्मादिभिर्गणपतिब्रह्मविष्णुरुद्रजीवगुणपरमात्मानः मूलाधारादि-चक्रेषु उपासनीयाः स्वदेहान्तस्थानानि तद्बाह्यदेवरूपाणि च परिकल्प्य पूजनीयानीत्यर्थः तादृगनुष्ठानासक्तानां आद्य-ज्ञानां गणेशेनेमाहृदयाः पञ्च पूज्याः इति सम्यगुपदिष्टा वीर-भद्रैकदन्तादयः नवनीतस्वर्णसन्तानगणपत्युपासकाः परम-गतं नत्वा उच्छिष्टहरिद्रादिपुत्रादिभिः गणपूजापराः मुद्रा-द्वैतविद्यावादिनः शिष्या बभूवुः इति पाठान्तरं । बा. सु. ।

शङ्कर विजये

अशीतितमं प्रकरणं ।

ततः श्रीशङ्कराचार्य्यः भवानीनगरं प्राप । (१) तत्रादित्या पादपद्मैर्विचित्रां (२) कुर्वन् पलाशोत्तमाङ्गार्चिताङ्गि ं तां सकलपूर्णरूपां सन्निध्योऽभजत् सः । एवं सकलय ः श्रीशङ्कराचार्य्यः समस्तशिष्याचरितपूजाङ्गीकारविलसत्च क्रमतः सर्व्वदेवार्च्चितो गुरुरिव प्रकाशमानमूर्त्तिः तत्र मासत्र समतिष्ठत् । तत्रस्थाः परमगुरुं (३) यतिशिरोमणिं शिरोभि रभिवाद्य (४) सविनयम् इदमूचुः । स्वामिन्नस्मन्मतमति विचि- त्रतरं शृणु । भगवती (५) किल महाशम्भुशक्तिः प्रपञ्चम् कारणं गुणातीतवृत्तिश्च (६) तन्मायावशात् महत्तत्वादि-

१ ततः श्रीशङ्कराचार्य्यस्तुलाभवानीनगरं प्राप्य समति ष्ठत् । स. प. पु. ।

२ पादपद्मैः पवित्रां । वा. पु. ।

३ परमपुरुषं । तै. पु. ।

४ शिरसाभिवाद्य । वा. पु. । स. पु. । का. पु. ।

५ मतमप्रीतिकृचित् भगवती । वा. पु. ।

६ प्रपञ्चमूलकारणगुणातीतस्वरूपिणी । वा. पु. ।

दखिलमुत्पन्नं तद्द्वारा अस्याश्चोत्पत्तिरस्याश्चोत्पत्तिश्च विद्या भवति तस्याः मनोवाग्बुद्ध्यतीतत्वात् तदंशयाः भवान्याश्चरणारविन्दसेवापरास्तद्रक्तकुङ्कुमादिधारिणस्तत्पादाकाराकारितस्वर्णपादवलयगलबाहवो ये जीवन्मुक्ता एव विद्योपासकानाञ्च फलश्रवणात् सैव च प्रकृतिः प्रधानमिति च व्यवह्रियते तदुक्तं सांख्यसिद्धान्ते।

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥ इति।

श्रुतिश्च

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां नमामः इति। प्रकृतिपुरुषयोः शिवशक्त्योरत्सम्बन्धचन्द्रिकान्यायेनाभेदः। तथा च श्रुतिः।

मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरमिति।

एतदुपासनयैव मुक्तिं श्रुतिराह। विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सहाविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत इति। इयमेवैका मुमुक्षुभिरुपासनीया (१) तस्याः कटाक्षलेशेनैव मुक्तिदर्शनात् प्रकृतिश्चेश्वरश्चेत्यनेन श्रुतिवचसा प्रकृतिपुरुषयोरभेदात् सदेव सौम्येदमग्र आसीदित्यादि जगदुपादानकारणवाक्यानि प्रकृतिपराण्येव। अतः प्रकृत्युपासका इति (२) निरवद्यं किञ्च प्रथमनिहाववर्णाद्वर्णोत्पत्तिर्यथा तथैव तच्च-

---

१ अत उमासकैव सर्वैर्मुमुक्षुभिरुपासनीया। तै. मु.।

२ प्रकृत्युपासका मता इति। तै. मु.।

र्मेर्भवान्या ब्रह्मादिमहदुत्पत्तिः सिद्धैव । अतः सर्व्वदेवकारणस्य रुद्रस्य या शक्तिः चन्द्रचन्द्रिकान्यायेन तदुद्बोधरूपिणी स्वाधीनवल्लभेति प्रसिद्धा सैव भवानीति निश्चयज्ञानवतामस्माकं न कश्चिद्विचारः । परमपुरुषैर्भवद्भिरपि तदङ्गधारणपुरःसरं सैवोपासनीयेति प्राप्ते श्रीमदाचार्य्यस्वामिन इदमाहुः ।

ननु भवदुक्ता भवानी संसारभयहारिणी जगत्कारणमिति परन्तु (१) पुरुषस्य श्रेष्ठत्वादीशज्ञानेनैव मुक्तिरिति सर्व्वत्रापि प्रतिपादितत्वाच्च । आत्मानमात्मना ध्यात्वा मुक्तो भवति नान्यथेतिमुक्तिवचनदर्शनात् (२) मायातीतस्य परमात्मन एव ज्ञानेन मुक्तिः । ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेः । सांख्यसिद्धान्तेऽपि प्रकृत्यपेक्षया मायातीतस्य ज्ञानादेव मुक्तिः । तैत्तिरीयोपनिषदि अजास्वरूपमुक्त्वा तदितरत्वमीश्वरस्य दर्शितं ।

अजामेकां लोहितशुक्लकृष्णां
बह्वीं प्रजां जनयन्तीं सरूपां ।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः । इति श्रुतेः ।

विद्ययाऽमृतमश्नुत इति विद्यापदार्थश्चात्मभिन्नं सर्व्वमनित्यमात्मैव च शुद्धमुक्तसच्चिदानन्दरूप इति ज्ञानमेव । प्रकृतेरजात्वन्तु अनादिप्रवाहरूपेण स्वर्गादेरमृतत्ववदापेक्षिकम् । अन्यथा एकमेवाद्वितीयं ब्रह्मेतिश्रुतिविरोधापत्तेः । ज्ञानस्य

---

१ भयहारिण्येव तथापि । बा. पु. ।

२ मुक्तिदर्शनाच्च । बा. पु. । का. पु. ।

मोक्षसाधनत्वे मुक्तिदशायां न हि तत्सद्भावः शङ्कनीयः। यतः तत्त्वज्ञानमपि अन्ते कतकरेणुवत् अविद्यामपहृत्य स्वयमपि नश्यतीति नाद्वितीयत्वविरोधः (१)। अतः परस्मिन्नद्वितीये ब्रह्मणि भवान्यास्तद्बोधकारणं घटते। अतो विद्याशब्दवाच्या भवानी तदुपासनेन चित्तशुद्धौ जातायां लिङ्गशरीरभङ्गद्वारा

---

१ परमात्मन एव ज्ञानेन मुक्तिः। तैत्तिरीयोपनिषदि अजास्वरूपमुक्त्वा तदितरत्वमीश्वरस्य दर्शितं।

अजामेकां लोहितशुक्लकृष्णां
बह्वीः प्रजाः जनयन्तीं सरूपां।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः॥ इति

अतः परमात्मनः मायातीतस्य ज्ञानान्मुक्तिः। किञ्च सांख्यैरपि पुरुषस्योक्तं।

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः। इति

प्रकृत्यपेक्षया भिन्नस्य परमात्मन एव ज्ञानान्मुक्तिरिति निरवद्यं। ज्ञानस्य मोक्षसाधनत्वेन मुक्तिदशायां न हि तत्सद्भावः शङ्कनीयः ईश्वरव्यतिरिक्तस्य सर्वस्यानित्यत्वात् किन्तु जीवनिष्ठमज्ञानं परिहृत्य स्वयं नष्टा भवति सपङ्कं जलं कतकरेणुवत् कतकरेणुर्जलनिष्ठं पङ्कमपहृत्य स्वयमपि नष्टो भवति एवं विद्यावतां ब्रह्मैक्यमुक्तं। ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेः।

भा. पु.।

२ तद्बोधकारं। तै. पु.।

मोक्षः सिद्धः। अतो भवानीभक्ता भवन्तोऽपि सर्वाणि सगुणोपासनानि अल्पफलत्वात् परित्यज्य प्रमाणरहितं वेदविरुद्धकुङ्कुमपुण्ड्र-(१)-स्वर्णपादादिचिह्नानि परित्यज्य शुद्धाद्वैतविद्यया (२) ब्रह्माहमस्मीति निश्चयज्ञानेन मुक्ता भवथ। एवं प्राप्तये भिक्षादिपञ्चमार्गा न साधनमिति सम्यक् त्रिपुरकुमारबिन्दुभक्तपूर्णानन्दपूर्णभगवच्छरणसेवकप्रमुखा मत्वा भवानीभक्ताः परमगुरुं (३) यतिशिरोमणिं नत्वा त्यक्तलिङ्गाः कृताञ्जलयः शुद्धाद्वैततत्त्वाश्रिताचाराः स्नानसन्ध्यावन्दनपञ्चपूजादिनिरताः सच्छिष्या बभूवुः।

इत्यनन्तानन्दगिरिकृतौ शक्तिमतनिबर्हणं नामैकोनविंशं प्रकरणं ॥ * ॥

---

१ सगुणोपासनानि परित्यज्य कुङ्कुमपुण्ड्रेत्यादि। वा. पु.।

२ शुद्धाद्वैतविद्यायां। वा. पु.।

३ परमपुरुषं। वा. पु.।

विंशं प्रकरणं।

अतः परं (१) शक्तमोपदेशस्थाः कुवलयपुरादिपत्तनाश्रिताः समागत्य परमगुरुमाचार्य्यस्वामिनं नत्वेदमूचुः (२) स्वामिन् महालक्ष्मीर्मातैव सर्व्वफलदा जगतां उत्पत्तिस्थितिलयकारणं भगवतो विष्णोः प्राणशक्तिः। तद्द्वारा पार्व्वतीवाण्यादिशक्तयश्च बहुधा उत्पन्ना। किञ्च त्रिमूर्त्तीनां मूलकारणमपि तच्छक्तिरपि सैवैका भगवत्येव परमपुरुषस्य सच्छब्दवाच्यस्य तत्कारणस्य प्रकृतेरसच्छब्दवाच्यत्वञ्च तैत्तिरीयोपनिषदि समाम्नातं। असद्वा इदमग्र आसीत् ततो वै सदजायत इति अतो मूलप्रकृतिः परमशक्तिः ब्रह्मादिप्रलये सर्व्वानपि संभक्ष्य गुणातीतरूपा असद्रूपेणापि आसीत् पुनः सृष्टिकाले तस्मादेव ब्रह्मादयो जाता इति जगदुपादानकारणं सैवैकैव। तथापीश्वरो प्यस्तीति यदुच्यते तदन्तर्वर्त्त्येव

---

१ एवं श्रीमदाचार्य्यैः कृतं शक्तिमतनिरासं ज्ञात्वा पा. पु.। पाठेऽपि श्रुत्वा भवितुमुचितं।

२ नत्वा किञ्चेदमूचुः। पा. पु.।

सोपीति विचारय तदादीनां (१) सम्बन्धत्वात्। अतः परब्रह्मणोऽपि सविमर्शता कल्पनीया। तयोः सार्व्वकालिकनित्यत्वाच्चन्द्रचन्द्रिकान्यायेन च भवद्भेदस्यापि विरुद्धत्वाभावात् परब्रह्मोपासनं भवद्भिरपि कर्त्तव्यं मुक्तिकाङ्क्षिभिरिति। अतः कमलायाः सर्व्वोत्कृष्टत्वात् तदुपासनं तच्चिह्नानां कमलपद्माक्षमालाकुङ्कुमानां भुजकण्ठललाटादिषु धारणं कुर्व्वः भवद्भिरपि तथैवानुष्ठेयं मुक्त्यर्थमिति (२) श्लिष्टभूषणगङ्गाकीर्त्तिलक्ष्मीविलासरमाभक्तादिभिः सर्व्वैर्विज्ञापितः श्रीशङ्कराचार्य्यगुरुरिदमाह।

श्रुतमद्भुतं भवद्भिः प्रतिपादितं मतं। भोः कमलाभक्ताः भवन्मतं न सम्यगाभाति। यतः स ईशः सर्व्वानुगत स आत्मा तत्त्वमसि श्वेतकेतो सदेव सोम्येदमग्र आसीत्। यः सर्व्वज्ञः सर्व्वविदित्यादिसङ्गश्रुतिप्रपञ्चकारी विचारितः परमात्मा अपहतपाप्मा सर्व्वातीतः सर्व्वकारणः सर्व्वाधारः सर्व्वमयः स एकोऽद्वितीयः परानन्दमयः सदा वर्त्तते। तदिच्छारूपायाः प्रकृतेस्तदाधारत्वेन तस्मिन् परमात्मनि प्रकृति गुणमयी निजाङ्गं परित्यज्य नष्टसर्व्वविकारा सद्रूपा समभवत्। पराधीनवृत्तिप्रत्यासत्तिप्रकृतेः स्वतन्त्रलेशाभावात् कथं मुक्ता स्वस्य मुक्ताभावे कथं मुक्तिप्रदा भवति। विद्यारूपायास्तस्यास्तथावि-

---

१ सोपीति वियदादीनां। वा. पु.।

२ अतः कमलायाः सर्व्वोत्कृष्टत्वात् भक्तानां भुजयोः कमलाङ्कधारिणां पद्माक्षमालादिविशेषभितभक्तकण्ठानां कुङ्कुमाङ्कितभक्तानां मुक्तिः स्थिर स्त्विति। वा. पु.।

असमर्थं नाप्नोति चेत् । ध्यानस्यापीश्वरजीवभिदारूपभूताज्ञान-
निवृत्तिमात्रमेव घटते । अतो मुक्तिसमवायिकारणस्य विद्या-
रूपस्यैव परमेश्वरत्वं वक्तुं न शक्यते । सर्वातीतं ब्रह्म प्रसिद्धं
अहमस्मि ब्रह्माहमस्मीति यो वा ज्ञाता तस्यैव मुक्तिः । अन्ये-
षामनित्योपासकानामनित्यलोकप्राप्तिः । क्षीणे पुण्ये पुनर्मर्त्यलो-
कप्राप्तिरिति सिद्धं । अतो यूयं कमलकुसुमपुञ्जादिकं परित्यज्य
शुद्धाद्वैतविद्यामाश्रित्य मुक्ता भवथ । इत्युपदिष्टास्ते परमगुरुं
नत्वा शुद्धाद्वैतविद्यानिरताः स्नानपञ्चपूजादिसत्कर्मिणः
शिष्या बभूवुः ।

इत्यनन्तानन्दगिरिकृतौ ब्रह्ममतैकदेशनिराकरणं नाम
प्रकरणं विंशम ॥ * ॥

एकविंशं प्रकरणं।

एवं निराकृतेषु दुर्गालक्ष्मीमतसिद्धान्तिषु पुनरन्ये पुस्तकपुण्ड्राः कमलपाणयः निगमकाविनयरागमसुवागादयः शारदोपासकाः स्वामिनं नत्वेदमूचुः (१)। भोः स्वामिन् विचित्रवेषधारित्वं समाश्रित्य दुर्गाकमलादिभक्तान् मतभ्रष्टान् कृत्वा सर्वक्षम इव वर्त्तसे इदानीमागतान् विद्धि नः शारदाभक्तान् निगमादीन् परमतभेदनपटून्। किलास्मन्मतं निगमसिद्धं। वेदानां तद्रूपत्वात् तेषां नित्यत्वाच्च वेदानां नित्यत्वप्राप्तौ तद्रूपायाः शारदायाः नित्यत्वमस्ति न वेति सन्देहाभावात् सैव जगत्कर्त्री, नित्या वाग्वेद इति श्रुतेः वाचा विरूपनित्ययेति श्रुतेश्च। अतः परात्परतरा शारदा जगदुपादान कारणं या नित्यप्रभा (२) जगद्वन्द्येऽस्ति सैव वाक् स ब्रह्मात्मा

---

१ पुनरन्ये शारदोपासकाः पुस्तकपुण्ड्राः कमलपाणयः प्रत्यवतिष्ठन्ते। ते किंच निगमसाविनयरागमसुवागाद्याः सर्वा वागित्यादयः परमगुरुमिदमूचुः। वा. पु.।

२ यथानित्यप्रभा। स. पु.।

शिवनारायणादिशब्दवाच्यगुणातीतशक्तिः सद्गुरोः परब्रह्माद्भु-
त्पत्तिरित्यविरुद्धं। अतः सर्वैर्मुमुक्षुभिः सैव निरक्षरमुपास-
नीया। अतो भवन्तोऽपि वृथाग्रजालं परित्यज्य पुस्तका-
दभिश्चिह्निताः वागुपासनं कुरुध्वं वाक्स्वरूपज्ञानेनैव मुक्ता
भवथ। अवेदार्थवित्पुरुषाः तं परमं वाग्रूपं न वेदुः। नावेद-
विन्मनुते तं बृहन्तमिति श्रुतेः। अतः सद्गुर्वादिशब्दवाच्य
परं वाग्रूपं सम्यग्वेत्ता पुरुषो मुक्तः। ज्ञानस्य तदतिरेकेण
मुक्त्यभावात्। आत्मा वेदो ऽध्येतव्यः श्रोतव्यो मन्तव्यो निदि-
ध्यासितव्यः साक्षात्कर्त्तव्येति श्रुतेः। अतः सर्व्वदा निश्चयेन वाग
पानुसन्धानं कुरुत। एवं प्राप्ते।

श्रीमदाचार्य्यैरिदमुच्यते किं निगममूढ अद्यापि भवद-
ज्ञानं केन वारयितुं शक्यं। भोः सारस्वताः भवन्मतमसमञ्जसं
कस्मात् श्रूयतां। वर्णात्मकस्य नित्यत्वमभिमतमुतवेदादिरूप-
वर्णसन्ततेः। नाद्यः उत्पन्नो गकारः नष्टो गकार इत्यादि प्रती-
तेर्वर्णमात्रस्यानित्यत्वात्। सोऽयं गकार इत्यादिप्रतीतिस्तु सेयं
दीपज्वालेतिवत्सादृश्यावलम्बनत्वात्। सर्व्वप्राणिप्रलये सर्व्वस्य
वर्णस्यापि प्रलयसम्भवाच्च। न द्वितीयः। यस्य निश्वसितं वेदा
इति अन्यत्वदर्शनात् यच्चान्यं तदनित्यमिति प्रमाणैरनित्य-
त्वावगतेः। वाचा विरूपनित्यया इत्यादिश्रुतिस्तु प्रवाहानादि-
तया सर्गादिष्वविच्छिन्नतां प्रतिपादयन्ति नात्यन्तिकं।(३)

---

१ शब्दस्य केन नित्यत्वं सत्ये वाक्षिप्तता स्यात् कण्ठता-
ल्वोष्ठादिसङ्घातज्ञानशब्दरूपवाच्यः कथं नित्यत्वशङ्का